भावत्वस्यान्योन्याभावत्वगर्भत्वेऽन्योन्याश्रयापत्तिः। एवमभावैस्याभावभिन्नत्वरूपत्वेऽभावेनभावइति
व्याघातश्चेत्यानुपपत्तिश्च। इहेदमतादृशघटविधेयतयेदंतेदमित्यादि। तस्मादवयवोपाधिरनुयोगितादि
योधअभावत्वमितिवदंति। तत्रनव्याः। अभावत्वस्यावयवोपाधित्वेप्रमाणाभावः। किंतुभावभिन्नत्वं। स
भावसामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसंसर्गाभावरूपंतत्रपूर्वानुपस्थितमपिप्रकारः
एवंचघटाभावपटाभावप्रतीतीनामभावांशेऽनुगतत्वमप्युपपद्यते। नचविधितावश्यस्यासत्ताभावव्यव
स्थारूपतत्तत्प्रकारत्वोपगमाद्। अतएवसत्तारूपप्रतियोगिज्ञानंविनाघटोनास्तीतिबुद्धेरप्रमात्वं। अभा
वत्वप्रकारकप्रत्यक्षत्वंप्रतियोगिधियोहेतुत्वात्। अन्यथाइदंतयाप्रतीत्यनापत्तेः। नचसत्ताभावरूप
स्याभावत्वस्यानुपस्थितत्वप्रकारत्वेविशेषणधियोहेतुत्वेऽपिधारइतिधांविशेषणभेदेहेतु
ताधिभिन्नत्वेनतत्रतद्धेतुत्वानुपगमाद्। फलानुरोधिसाक्षिव्यवस्थाइतिवाहुः। संसर्गान्योभान्योभेद
तइतिमूलमदेकःसंसर्गस्वरूपोऽन्योन्याभावोरव्यइतिप्रतीतेः। तत्रायुक्तं। संसर्गस्याभावत्वानंगी
कारादित्यतआह। संसर्गाभावेति। अनेनलक्षणाद्योलक्षणाहेतिभावः। संसर्गाभावत्वमिति। अन्योन्याभावे
तिव्याप्तिवारणायान्योन्याभावभिन्नेति। घटादावतिव्याप्तिवारणायाभावपदं। एवमग्रेपि। तादात्म्येति। तादा
त्म्येनतादात्म्यावच्छिन्नप्रतियोगितायांविवक्षितंतेनसंयोगावच्छिन्नप्रतियोगिताकेसंयोग्यंशेतावा
वेतिव्याप्तिः। प्रागभावस्यलक्षणमाह। विशेष्यभावत्वमिति। अत्रध्वंसेतिव्याप्तिवारणायद्विनोक्तौ।

DR. BHAU DAJI INSTITUTE

नन्वनुमागभाथसत्वेदिंमानमितिचेदत्रोच्यतेपुनरुत्पादश्चियातस्तिद्वितिप्रोथः।केचिदुजानोघटइतिधटस्य
न्नोघटध्वंसइतिप्रत्यक्षबलेननानुमितिरिष्यते।अनुमागभाथेः।इहहदानीघटभाथइतिलोकानांप्रत्ययोभाथा
त्।नचतद्घटोपधायकतत्कपालतत्संयोगाद्।नातन्नद्घटोत्पत्तिकालेविसत्वात्पुनरपितत्तद्घटात्सत्ति।प्रा
गभाथंगीकारेचतद्भाथादेवनपुनस्तदुत्पत्तिरितिचेत्।जन्यद्रव्यत्वाथछिन्नेप्रतिजनकतयाकुलाल
समथायसंबंधाथछिन्नप्रतियोगिनाथद्रव्याभावस्यविरहेसतिदापत्तेसंभथात्।नचजन्यद्रव्योभाथ
स्यजन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्यवाहेतुत्वेत्रिसत्रथिनिगमनाविरहेणतादृशद्रव्याभाव
स्यतादृशध्वंसाभावानांचकारणतामपेक्ष्यलाघवादेकएवप्रागभाथोहेतुःकल्प्यतइतिचाथं।प्रागभाथकल्प
नेविनश्यत्कालोत्पत्तिकानंतपदार्थप्रतियोगिताकानामनंतानांप्रागभाथानांथिनिगमनाविरहेणहेतुतासादु
थरित्यानंथाचप्रागभाथरूपधर्मिकल्पनागौरथपरमतिरिच्यतइत्याहुः।अत्रवदंतिस्यानधिकरणेषुतंतु
षुपटोत्पत्तिधारणायसहस्रतंतुकपटस्यलेखहेतुनतंदूनतत्संयोगानांचतत्तद्व्यक्तित्वेनहेतुत्वकल्पनापे
क्षयैकप्रागभाथस्यहेतुतालेघीयसी।अथैवमपिद्वित्रितंतुषुसहस्रतंतुकपटोत्पत्तिःनचचर
मसंयोगध्वंसस्तद्व्यक्तित्वेनहेतुत्वान्नापत्तिरितिथाच्यं।तथासतिस्यानधिकरणतंतुषुचिरमसंयोगा
भाथादेथपटोत्पत्तिधारणसभवेप्रागभाथकल्पनानौचित्यादितिचेन्नाचरमसंयोगस्यसमथायघटितसामा
नाधिकरण्यमत्रासत्याहेतुत्वेतत्तंतरेपिसमथायेनपटोत्पत्तेरसमथायेनचरमसंयोगाभाथेनध्वंसि

धारत्वसमानकालिकसंबंधेनतत्पटसाधछिन्नेमतिचरमसंयोगध्वंसस्यकालिकसंबंधेनहेतुताथाच्या।तथा
चस्यानधिकरणतंतुष्वपिकालिकतयाचरमसंयोगसत्वेपटोत्पत्तिधारणायप्रागभाथहेतुत्वंस्याथ्ययत्यादि
ति।एवमप्यसत्कथ्मनातिरिक्तःपदार्थस्तभावितस्यसप्रतियोगित्वेप्रमाणाभाथइतिचेत्तुतत्र।ध्वंसस्यलक्ष
णमाह।जन्याभाथत्वमिति।प्रागभाथेनिव्यासिधारणायजन्यमिति।अत्यंताभावस्यलक्षणमाह।नित्येति।ध्वंसा
दिधारणायधर्मिपदं।नन्वत्यंताभाथस्यनित्यत्वेघटानयनानंतरमपिभूतलेघटोनास्तीतिमतीस्यात्तत्रापत्तिरित्यत
आह।यत्रेतिं।तथाचसंबंधाभाथादेथघटानयनानंतरघटात्यंताभावबुद्धिर्नेतिभावः।कालविशेषविशिष्टस्य
रूपस्यसंसर्गतयोपगमादेथघटथतिघटोनास्तीतिमतीत्यभाथोपपत्तौचतुर्थसंसर्गाभावेमानाभाथइत्यत्र
सःकथंदित्यनेनसूचितः।ननुमास्तुघटकालेघटात्यंताभावबुद्धिःघटोत्पत्तेःप्राक्कालेतुस्यादित्याशंक्याह।
अत्रेत्यादिना।ननुतर्हिरक्तरूपप्रागभाथाधिकरणेश्यामघटेश्यामरूपध्वंसाधिकरणेचरक्तघटकथंरक्तोना
स्तिश्यामोनास्तीतिमतीतिः।ध्वंसप्रागभयोरधिकरणेत्यंताभावस्यासत्वादित्यतआह।श्यामघटइति।तत्रेति।
ध्वंसप्रागभाथयोरित्यर्थः।अत्यंताभावेनसहेतिशेषः।तथाचनन्वयमतपूर्वपक्षिकथितशंकायामिष्टापत्तिरेथे
तिभाथः।युक्तंचैतत्।कथमन्यापूर्वमयेपिरक्तेमध्येश्यामेघटेरक्तंरूपंनास्तीत्याकारकप्रत्ययःतस्यसामान्याथ
गाहित्वात्।नचेदृशप्रत्ययोरक्तेमध्वंसाद्यवगाहीपूर्वापररक्तेमध्वंसप्रागभाथयोरप्रसिद्धेरक्तेनास्तीति
प्रसंगादिति।नचरक्तत्वावछिन्नप्रतियोगितोरक्तंध्वंसप्रागभाथयोरप्याथश्रितेनांतराश्यामेरक्तेनास्तीति

प्रत्ययस्तदध्वंसप्रागभावयोः सामान्याधिकरण्यप्रतियोगिताकत्वरूपैकारत्व। ननु पूर्वावररूपध्वंसयतिरे
केतत्रतदतदनभ्युपगमादिति चेत्। विनिगमनाविरहेणपदार्थतिरध्वंसप्रागभावयोरवितत्वैकारप्रस
ङ्गेनगौरवात्। तदपेक्षयाअसंतोभावस्यांतरालवर्त्तादोसंबंधाऽन्यनेकाधाधिक्यन्यधिक्तारः। नन्वभाव
स्याधिकरणात्मकत्वेगौरवंउद्भाव्यितुमनंतेत्युक्तं। अतिरिक्तेति। भावातिरिक्तेत्यर्थः। अभावस्याधि
करणात्मकत्वेभेदाधाराधेयभावानुपपत्तिरूपोदोषः सोस्मन्मतेनेत्याह। एवंचेति। अधिकरणापेक्षयाअतिरिक्तत्वं
चेत्यर्थः। नन्वभावाधिकरणकाभावस्याधिकरणात्मकत्वेयथा आधाराधेयभावोपपत्तिस्तथासर्वाभ्यस्थि
त्यतोदूषणांतरमाह। एवंचेति। अन्यथा। भावस्याधिकरणात्मकत्वे। एतेन। वक्ष्यमाणदूषणेन। परस्परधर्म
तोपन्नानांसप्तपदार्थानामेवपरस्परभेदव्यवस्थापयितुमाह। इदानीमिति। पदार्थनिरूपणानंतरमित्यर्थः। तद
निरूपणेतुपदार्थघटितस्यसाधर्म्यतयानिरूपणासभावादितिभावः। समानोधर्मः सधर्मः तस्यभावः सा
धर्म्यं। एवंवैधर्म्यमित्यत्रापितिशब्दमध्याहृत्यहेतुत्वेनाहेतिमाह। समानोधर्मोयेषामिति। केवलान्वयिप्र
तियोगिकत्वंविषयभेदेनविषयतायाः भेदेविज्ञानविषयतासंबंधेनकेवलान्वयित्वमस्त्वितिभावः। एवमग्रेपि।
ज्ञेयमादीत्यादिनापदार्थंदर्शयति। एवमभिधेयत्वेति। अभिधेयत्वंअभिधाविषयत्वं। अभिधाचसंके
तः। ममेयमादिकमित्यादिनाअस्तित्वेपरिग्रहः। तत्रकालसंबंधित्वं। द्रव्यादीनांषण्णांसाधर्म्यंभावत्व

स्पष्टं। अतस्तदुपेक्ष्यद्रव्यादिपंचानांसाधर्म्यमूलेभवंतिसंद्रव्यादिना। अनकत्वेसतिभावत्वमिति। मूलेद्रव्यादयः पं एवंच।
चेत्यत्रद्रव्यपदं। भाषाअनेकद्रव्यवृत्तिधर्मेयपदमितिबोध्यं। अतएवभाष्येपंचानामित्यत्रनतुपंचभाषानामिति। अ
नेकभावत्वंचेत्यादि। अत्रानेकभावत्वमित्यंशस्यप्रतियोगिद्रव्यत्वस्यसामानाधिकरण्येनाभयसंबंधेनभेदविशिष्ट
त्वेसतिभावत्वमित्यं। तेनगुणादौसंख्यारूपस्यानेकत्वस्याभावेविनक्षतिः। भावत्वरूपतादृशधर्मादायसमवा
येनेत्यादिनाद्रव्यत्वेतरावच्छेदकधर्मविभाजकोपाधीति। उपाधिमत्त्वंसमवायस्वरूपसंबंधान्यतरसंबंधेनतै
त्वादिकसंबंधेनध्वंसस्यतादृशोपाधिमत्त्वेविनक्षतिः। समवायेनोपाधिमत्त्वविवक्षणेतुसामान्यादायाप्तिः
स्यादतस्तन्नोक्तं। अन्यतरघटकस्वरूपंतुकालिकसंबंधेनेत्यादि। तेनध्वंसेत्यादिः। अत्रचसमवेतस
मवेतवृत्तिपदार्थविभाजकोपाधिर्द्रव्यादिचतुष्टंसाधर्म्यबोध्यं। उद्देश्यतावच्छेदकपदस्यचरममुपादानमयुक्त
मतोवाजनयात्तदर्थं दर्शयति। द्रव्यगुणकर्मणामिति। निर्गुणक्रियइतिमूलं। तदर्थश्चगुणक्रियासंतानाभाव
वत्संतेनगुणक्रियान्योन्याभावमादायद्रव्येनातिव्याप्तिः। यद्यपिगुणेति। नचगुणगुणिनोर्यदक्षिणमेविषा
णवत्समानकालीनत्वात्कथंगुणशून्यत्वमितिवाच्यं। निर्गुणोगुणोस्तिस्वीकारेणतत्संभवात्। नचैवंघटादेरा
द्यक्षणेधाक्षतानस्यादितिवाच्यं। दृष्टापत्तेः। क्रियाशून्यत्वमिति। अथापीति। गुणेति। गुणवत्ताचसमवायेन।
तेनकालिकसंबंधेनगुणवद्गुणत्वेनगुणत्वादेरसंग्रहेविनक्षतिः। गुणवद्वृत्तित्वंचसमवायस्वरूपा
न्यतरसंबंधेनतेनसमवायेनगुणवद्वृत्तित्वाभिधानेतादृशस्यद्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्यद्रव्येस

सादतिव्याप्तिरथतेनैवतद्ग्रंथोयं। तदासामान्यादयव्याप्तिरितिपरास्तं। यदार्थविभाजकपदस्यहस्यमाह।
आकरज्ञत्वादिकंत्विति। कर्मादेरकरत्वाकारज्ञत्वरूपोपाधिमत्त्वाकारोनेतिव्याप्तिवारणायतत्पदमितिभावः। जात्या
दीनामपेक्षाबुद्धिमधीयसंबंधेनसामान्यवत्वात्सामान्यपदं। नदुस्तिमूलमनुक्रमतोव्याचष्टे। सामान्याधिक
रण्यमिति। तथाचसामान्यनिरूपिताधिकरणतानुसामान्यादेरेवार्थेसमवायस्याधिकरणतानियामकत्वा
भावादितिभावः। अथस्किद्वत्वापरिमांडल्यपदार्थनिर्वक्ति। परिमांडल्यमिति। तद्द्व्यणुकं। परिमांडल्यमिन्द्रा
नांनानुद्व्यणुकपरिमाणस्यविकारणत्वाभावात्तत्रातिव्याप्तिरतःपरिमांडल्यपदंद्व्यणुकपरिमाणस्याप्युपल
क्षकंतेनतस्याविलक्षणत्वमसिद्धमेवाह। अणुपरिमाणंत्रिति। परमाणुद्व्यणुकसाधारणमणुपरिमाणंत्रिसंख्यं।
परिमांडल्यस्यकारणत्वेबाधकमाह। तद्धीति। अणुपरिमाणंह्यन्यर्थः। तत्रेति। तस्यार्थेतत्रहेतुमाह। परिमाणस्येति।
स्वसमानजातीयेति। सजात्यमत्रपरिमाणविभाजकरूपेणबोध्यं। अणुजन्यस्येतिउत्तरंघाणोत्तरमेवेति
भावः। नचाणुजन्यस्याणुतरत्वमस्तुकिंबाधकमितिवाच्यं। तथासतिसटीकरजकषत्वसंगात्। ननुतर्हिद्व्यणुका
दिपरिमाणस्यकिंजनकमितिचेत्संख्येत्यवेहि। व्यक्ष्यतिचेदमुपरिष्टात्। मूलस्यन्यूनतापरिहरति।
एवमिति। कथोद्भूतइत्यनेनान्वयः। नकारणानीतिकथोद्भूतइत्यर्थः। तेद्वित्वयोर्महत्सामान्ययोः स्वविषयक
लौकिकप्रत्यक्षहेतुत्वासदत्वांतद्वित्वेहविशेषे। ननुकोभिप्रायेणपरिमांडल्यंविशेषविधयाकारण
त्वात्साधिमांडल्यभिन्नामितिसाधुरूक्तमित्यतआह। उद्भूतेति। यथाचयोगजधर्मजन्यं
त्वंतथाविशेषमानविषयकमपीतिभावः। ननुज्ञायमानसामान्यस्यमत्सासत्तिरेवज्ञायमानहेतोरस्यानु

मितिकरणत्वेनपरिमांडल्यस्यसामान्यलक्षणाजन्यज्ञानेनुमितेश्चकारणत्वात्साधिमांडल्यभिन्ना
मितिहमूलमसंगतमतआह। ज्ञायमानेति। आत्ममनःसंयोगेति। विशेषतोदृष्टयःकिंकुलालप्रत्यक्षेसमवेतस्य
हेतुत्वादितिभावः। यद्यविशेषतोप्रत्यक्षइत्येवकुतोचितंतथाविटादिकारणमतेआत्मैकत्वमहत्त्वयोरयोग्यत्वात्त
त्प्रत्यक्षंनसंभवतीत्यात्ममनःसइत्युक्तं। केचित्तुकारणत्वंचान्यत्रपरिमांडल्यादिभ्यइत्यभीप्सयाह्याद्यग्रहणा
त्परममहत्त्वंगृह्यतइतिवदंतोमाध्यर्षणामात्मपरिमाणमविनश्वरंचिकारणमित्याशयोल्लभ्यते। नचतत्रप
रममहत्परमाणुपरिमाणातिरिक्तपरममहत्त्वंसिद्धमेवेतिवाच्यं। मानाभावादितिवदंतितन्मतंदूषयितुमुपन्य
स्यति। तेत्वाहुरिति। आत्ममहत्परिमाणस्यापीत्यर्थः। आचार्यगुणमुदयनाचार्यगुणं। ज्ञानातिरिक्तंप्रमेयमिति। का
रणत्वंचात्रधर्मेतरकार्यविशेषवेद्याचार्यग्रंथः। ज्ञातधर्मज्ञानादयःतदतिरिक्तभावकार्यमितिकारणत्वं
परिमांडल्यादिभिन्नानांसाधर्म्यमितितदर्थः। एवंचपरिमांडल्यादीत्यादिपदेनपरममहत्त्वंगृह्यतामाचा
र्यगुणमयमात्रयोग्यत्वात्परिमांडल्यस्यपरममहत्त्वादीनांचज्ञानातिरिक्तंप्रतिनकारणत्वंनतुकारणत्वसामा
न्याभावस्तदनुमतइतिभावः। अत्रआद्येरूपादिमांडल्यादीत्यादिपदार्थेषुसुखदुःखादेरजनितार्थेष्वति
रूपादेःपाकजनष्टपरमाणुरूपादेश्चागणनात्तेषांलक्ष्यत्वमक्षुण्णं। एवंचतेषुज्ञानातिरिक्तभावकार्यत्वरू
पधर्मस्यसत्त्वेन्यायलक्षणस्याव्याप्तिंपरिचिंत्यसपक्षसत्त्वेग्रंथइतिध्येयं। मूलेन्यथासिद्धि
रितिदंडत्वादेर्निमित्तायाःपूर्वजातेर्यायाःसत्त्वादितिव्याप्तिरतउक्तमन्यथासिद्धिरन्येति। तद्घटत्वादिछ

त्रैत्यत्रकूलनियतेत्याद्यन्यथासिद्धिमत्यविघटत्वावच्छिन्नेऽनन्यथासिद्धत्वद्रासभेऽतिव्याप्तिवारणायनियतेति। नि
यतपूर्ववर्त्तिजातीयत्वेसत्यर्थः।तेनारण्यस्थदंडादावतिव्याप्तिरूपयोग्यतासंपत्तिः।तज्जातीयत्वंचनियतपूर्ववर्त्तिता
वच्छेदकदंडत्वादिमत्त्वमेवेति।किंपुनस्तानिकारणानीत्याकांक्षायामाह।तस्येति।यत्समवेतमिति।यदवच्छिन्नं
स्वकारणतावच्छेदकंयद्यत्समवायसंबंधेनोत्पद्यतेतत्तन्मवच्छिन्नमित्यर्थः।घ
टत्वावच्छिन्नंहिस्वकारणतावच्छेदककपालत्वाद्यवच्छिन्नेसमवायसंबंधेनोत्पद्यतइतिघटत्वावच्छिन्नं
प्रतिकपालत्वाद्यवच्छिन्नंसमवायिकारणं।स्वकारणतावच्छेदकेतुक्त्याचनद्रव्यत्वादेर्घटादिसमवायिकारण
तावच्छेदकत्वमिति।तत्रान्नमिति।दूरंरसमवायिकारणादवयवित्वाद्विकारणाच्च।पटसमवायिकारणंतंतुसम
वेततंतुत्वादवयवित्वाद्विकारणाच्चजन्यकमिति।तंतुत्वेचान्यथासिद्धत्वेनानन्यथासिद्धत्वियतपूर्ववर्त्तितायाअ
भावेनातिप्रसंगः।मुक्तावयत्यामत्रयद्वयीति।तुरीतंतुसंयोगस्यपटंप्रतिकुलालसमवायिकारणात्मिकेतु
नाशंप्रतिनीयंतुरीतंतुसंयोगनाशेपटनाशापत्तेरसमवायिकारणनाशस्यकार्यनाशजनकत्वात्।नचासमवायि
कारणंस्वकार्यनाशकत्वेप्रमाणाभावइतिवाच्यं।द्व्यणुकनाशान्यथानुपपत्तेरेवमानत्वादिति।नचतंतुपुनर्ष्ट २३
बुद्धिरेवसमवायिकारणंक्षणद्वयंद्रव्यस्यस्थितिःस्यादितिवाच्यं।दृष्टापत्तेः।कारणांतरकल्पनेनगौरवात्।
नचकार्यसमवायिनाशयोरसमानाधिकरणयोःकथंहेतुतेतिवाच्यं।प्रतियोगितयाद्रव्यनाशात्तावच्छिन्नं
प्रतिस्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतेभयसंबंधेननाशत्वेनहेतुतायाविवक्षितत्वात्।

इहकालिकसंबंधस्यकारणतावच्छेदकसंबंधत्वेतंतीयक्षणेघटादेर्नाशापत्तिरतःस्वप्रतियोगिसमवायिसमवेतत्व
त्वेनेतिस्वप्रतियोगिजन्यत्वसंबंधस्यदंडनाशाद्घटनाशापत्तेरुक्षितः।नाशादानाशप्रसंगवारणायकालि
कसंबंधत्वेनेतिःपटंप्रतितुकपालपवनसंयोगनाशात्घटनाशापत्तिरेवमपिदुर्वारेतिचेन्नतेतदाप्यप्रतियोगि
जन्यत्वरूपप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणेनैतन्निरसंबंधेननाशत्वेनहेतुतायोक्ता।नचैवमपितु
रीतंतुसंयोगनाशात्पटनाशापत्तिरितिवाच्यं।तुरीतंतुसंयोगस्यपटंप्रतिकारणतेवनकिंतुतुर्यक्षणसंयोगसंबं
धेनतंतुनिष्ठासतीपटजनिकेतिनतथाप्रतिप्रसंगइत्यपि।एवंचयद्विशेषलक्षणेषुतुरीतंतुसंयोगादिभेदोनाम
मवेशेनलाघवमपीतिकेचित्।यदुक्तंतत्स्वप्रतियोगिनिष्ठासमवायिकारणतानिरूपितफलोपधानात्मकजन्य
त्वसंबंधेननाशत्वेनहेतुता।तुरीतंतुसंयोगस्तुनिजंतंतुसमवायीतिनतन्नाशेनपटनाशइत्यन्यैरुक्तत्वात्।
वेगादीनामित्यादिनास्पर्शपरिग्रहः।अभिघातादीति।स्पर्शवद्द्रव्यसंयोगः।मनःसंयोगाद्वाशसंयोगयोर
तिव्याप्तेरिहस्पर्शवद्वेगपदे।घटनिष्ठेपरमाणुसंयोगेलक्ष्यएव।नचतत्तोविजातीयोत्पत्तिःस्यादितिवाच्यं।विजा
तीयाभिघातस्यक्रियाजनकत्वात्।आदिनोदनापरिग्रहः।नोदनाच्चस्पर्शवत्संयोगः।ज्ञानादीत्यादिना
द्वेषापरिग्रहः।द्वेषादीत्यत्रमद्यनेत्रसंयोगःपरिग्रहः।तंतुसमवेतत्वेसतितुरीतंतुसंयोगाद्यन्यत्वेसतिपटकारण
संयोगासमवायिकारणत्वमितिविशेषलक्षणवक्तव्यमित्याह।तथापीति।दुरुक्तंतत्तुरीतंतुसंयोगत्वा
वच्छिन्नप्रतियोगिताकभेदःपटासमवायिकारणलक्षणघटकतयाग्रथकर्तुर्नाभिमतइतितंतुभिन्न

समवेतत्वाधिष्ठभेदएव। अन्यथाहि तंतुसंयोगादिभेदमंतरेणैकस्मिन्नेवेशे पटस्याभेदकल्पनेवेशेनैगोरश्वादिति
ध्येयं। एतेनतंतुमात्रसमवेतत्वमिवेशेनैवोपपत्तौतुरीतंतुसंयोगोन्यत्रेवेशानमनुचितमित्यपास्तं। मात्रप
दस्यासमदुक्तार्थकत्वात्। मिश्राद्यसमवायिकारणलक्षणेआद्यमात्रसमवेतत्वाधिष्ठभवतियोगिताभेदएवनि
वेशोनतुज्ञानत्वाद्यधिष्ठभेदइतिबोध्यं। तथाचेति। द्विविधमत्वासत्तिविवक्षणेत्यर्थः। फलितार्थइतिद्वि
धमत्वासत्योरितिशेषः। पर्यवसितमसमवायिकारणलक्षणमाह। इत्थंचेति। कार्यैकार्थसमवायसत्तिः समवाय
संबंधः। कारणैकार्थसमवायसत्तिः स्वसमवायिसमवेतसंबंधः। तथाचसमवायस्वसमवायिसमवेतत्वान्यतर
संबंधेनकारणत्वेसत्यात्मविशेषगुणान्यत्वंसामान्यतोऽसमवायिकारणत्वमित्यर्थः। अत्रपटासमवायि
कारणस्यतंतुसंयोगस्यपटरूपासमवायिकारणस्यतंतुरूपस्यचसंग्रहायस्वसमवायिसमवेत
त्वयोःमवेशः। घटरूपंप्रतिघटस्यासमवायिकारणतावारणायतादृशान्यतरत्वासत्वासमवायिकारणेत्व
त्वासत्वेसतिकारणत्वंपरिशुध्यतादृशान्यतरत्वासत्वाकारणत्वपर्यंतानुधावनं। आत्मविशेषगुणान्या
त्मविशेषेत्यंशभागः। ननुसामान्यतोऽसमवायिकारणत्वंदुरवधारितमित्याशंक्याह। सामान्याधिकरण्यस
त्वात्। अन्यथादंडादेःकारणत्वेऽनवस्थात्। समवायसामानाधिकरण्यरूपकारणतावच्छेदकसंबंधभेदाद
नुगमेति। अथकार्यनाशजनकनाशप्रतियोगित्वंतत्त्वमितिचेन्न। द्वित्वनाशयोरेकनाशप्रतियोगित्वा
मपेक्षादुष्टत्वमित्याहेतिशब्देति। अथयथामात्रसंयोगत्वंद्रव्यासमवायिकारणत्वमित्यादिनिर्वक्तव्यलक्षणं

निर्वाच्यं। अस्तुतर्हीपाधिरेवयतद्भिन्ने। भिन्नकारणमिति। अत्रेदंबोध्यं। समवायिकारणत्वासमवायिकारणत्वान्ये
कारणत्वमेवनिमित्तकारणत्वं। तेनतुरीपटसंयोगंप्रतितुरीतंतुसंयोगस्यासमवायिकारणत्वेऽपिनतस्यपटंप्रति
निमित्तकारणत्वक्षतिरिति। यत्कार्यमितीति। यद्धर्मावच्छिन्नंप्रतीत्यर्थः। येनरूपेणेति। यद्रूपावच्छेदेनेत्यर्थः।
इत्थंचतद्धर्मावच्छिन्नभिन्नरूपितनियतपूर्ववृत्तित्वग्रहविषयतावच्छेदकंयेसतितद्धर्मावच्छिन्नंप्रतिस्वतंत्रान्वयव्य
तिरेकसून्यत्वंतद्धर्मावच्छिन्नंप्रतिअन्यथासिद्धत्वंग्रथनमित्यर्थः। हितीयान्यथासिद्धंदंडरूपंधारणायस्यसं
तंकपालसंयोगोघटपूर्ववृत्तीत्यादिग्रहेकपालस्यापितादृशविशेष्यतावच्छेदकत्वात्तत्तद्व्यक्तिधारणायविशे
ष्यं। किंतुकारणमिति। स्यात्त्वयातेकार्यनिरूपितान्वयव्यतिरेकसून्यत्वेसतितत्कार्यकारणावच्छिन्नस्यनिश्चित
कार्यनिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यतासंबंधेनतत्कार्यंप्रतिअन्यथासिद्धमित्यर्थः। कपालसंयोगोघटपू
र्ववृत्तीत्यादिपूर्ववृत्तित्वंविशेष्यतायाःकपालसंयोगनिष्ठायाःकपालावच्छिन्नत्वात्कपालसंयोगेऽति
व्याप्तिवारणायसत्यंतं। दंडत्वादिवारणायविशेष्यमिति। अत्रेतरान्वयव्यतिरेकयुक्तान्वयव्यतिरेकशालि
त्वमिवरूपेणेतिहितीयान्यथासिध्योःसंग्रहेविभेदेनान्यथासिद्धद्वयप्रदर्शनंशिष्यबुद्धिवैशद्यार्थमिति
ध्येयं। कारणत्वंचात्रेदंभगन्वयव्यतिरेकज्ञानेत्यं। तेनजन्यत्वंप्रतीति। फलानुगुणमन्वयं प्रती
त्यर्थः। तेननकुलात्मजनकैकतुर्थान्यथासिध्याश्रयेतित्यादिशंकते। शब्दाश्रयत्वेनेति। अन्यंप्रतीत्यादि
टंतीयान्यथासिध्यभावादितिभावः। पंचमीति। अत्रद्रव्यकर्मसामान्यविशेषसमवायेत्यर्थः। यद्यपिश्री

येन यत्र प्रामाणिकानां व्यवहारस्तद्भेदस्य निवेशनीयतया नित्यतपदेनैव रासभादेर्धरणेतद्भेदस्याप्यर्थशादि
प्यक्षिप्तायात्। पूर्वधर्मित्वं चाध्ययहितपूर्ववर्त्तित्वं तेनव्यवहितपूर्वधर्मि[illegible]युदासः। अतएव च यागादेः स्वर्गकार
णत्वानुपपत्तापूर्वकल्पनया पूर्वसंबंधेनाव्यवहितपूर्ववर्त्तिनोऽपूर्वस्यसंबंधेनाव्यवहितपूर्ववर्त्तिनोऽपूर्वस्यसंबंधेनाश्रयहेतासंगच्छते। अन्यथा यागस्यापिनि
यतपूर्ववर्त्तित्वाधायेनापूर्वकल्पनेनस्यादिति। नचैतद्व्यस्यकारणत्वेव्यतिरेकव्यभिचारज्ञानस्यनियमांगग्रहेण
व्याप्तायगृहितयाविशेषितत्वेव्यभिचारग्रहस्यकथंकारणतागृहविशेषितत्वमितिवाच्यं। अवश्यकृतेत्वाद्य
न्यथासिद्धिज्ञानप्रयोजनत्वात्। नहिसरनिश्चितेतत्कार्यकारणत्वेतत्कार्यव्यतिरेकाव्यभिचारात्। तेनाकार्य
कृतेनानियतपूर्ववर्त्तिनान्यथासिद्धत्वज्ञानात्। नचाकृतकारणत्वस्यानन्यथासिद्धनियतपूर्ववर्त्तिनाधर्मेदकूट
मेवप्रतिबंधकाभावस्यतत्व्याप्तित्वेनहेतुतापत्तिः। यत्रनकारणत्वव्यवहारस्तत्तद्भेदकूटव्यतिरेकसर्वज्ञेनैव
ज्ञेयं। ननुव्याप्तिभेदकूटयसंबंधेनयार्थधिशिष्टेयोधर्मस्तत्संतदित्यविनयुक्तं। तस्यसंबंधत्वसंदेहात्। तस्मा
त्कारणत्वेपदार्थांतरमेवेत्याहुः। तदसत्। कारणत्वस्यातिरिक्तत्वेदंदोषसर्वदातत्प्रसक्तापत्तेः। नचानन्यथासिद्ध
त्वेसतीत्यादिधर्मस्तद्धर्मजकइतिवाच्यं। तादृशधर्मज्ञानस्याव्यवहितत्वेतस्यैवकारणताग्रहरूपत्वौचित्यात्। अकृत
त्वादेरुत्पादकमेवकारणमित्यत्र। घटादिकार्यसंबंधितयातद्धेतुत्वरूपधर्मस्यव्यंजकत्वादिति। वस्तुतः। कार्यान्वयव्यतिरे
कज्ञानपूर्वकाज्ञानव्यधीतरेकज्ञानत्वमित्यभिप्रेत्यमूलेतदयुक्तं। आलोकादेस्तुरथादिकारणेयागाभावरूपव्यतिरेकास
त्वेनाव्याप्तेः। मूलेगुणकर्मभावद्रव्यसमवा[illegible]धिकारणत्वमित्यपिक्लिष्टं। तत्रापियुक्तं। आत्मविशेषगुणेव्याप्तेर

DR BHAU DAJI

तत्रैवधर्मपरतयामूलेव्याचष्टे। असमवायिकारणमितिं। साधर्म्यमकरणेवैधर्म्यकथनमयुक्तमित्याशयादाह। अ
थवेति। सत्ताभिन्नद्रव्यत्वरूपजातिमत्त्वेद्रव्येतिव्याप्तिवारणायदंतं। सत्ताजातिमादायातिव्याप्तिवारणा
यससत्ताभिन्नेति। तत्रैवद्रव्यगुणान्यतरत्वरूपधर्मादायातिव्याप्तिवारणायजातीति। एतिंजातिमत्त्वंससत्ता
भिन्नंचेतिवक्तव्यं। तेनगुणादौद्रव्यत्वस्यकालिकेनवृत्तित्वात्। द्रव्यस्यचकालिकेनगुणादिमत्त्वाद्द्रव्येतिव्याप्तिः।
ननुगगनादिकंसर्वदाऽस्तीत्यादिव्यवहारान्नित्यद्रव्येष्वपिकालिकसंबंधेनाश्रितत्वसत्त्वाद्गगनादिनित्यद्रव्येष्व
तिप्रसंगमयुक्तमतआह। आश्रितत्वमितिं। समवायादिसंबंधेन। सर्वाधारतानियामकंकालिकसंबंधातिरिक्तसंबंधेन।
विशेषणत्वेति। कालिकविशेषणत्वेत्यर्थः। अभिमतद्रव्यातिरिक्तत्वंलक्ष्यतावच्छेदकं। नचसंयोगेनपरमाणोरवि
द्यमानेः परमाणावतिव्याप्तिः। तत्संयोगस्यद्व्यत्वनियामकत्वादिति। क्षित्यादीनांनवानांनिति। मूलस्थतुशब्देनसूचि
तमर्थमाहटमिति। इदानीमिति। ननुधात्वर्थक्रियातआप्तिमसद्द्रव्यतआह। कर्मवत्त्वमितिं। वेगवत्संयोगसंबंधि
त्वंहिकूर्मतयोः परत्वापरत्वयोर्हेतुरित्यस्मात्सन्निहृष्टमित्यपेक्षाबुद्धिः। कालसहतयोः परत्वापरत्वयोर्हेतुरय
मस्मादेतत्कालसंयुक्तद्रव्यमपेक्षाबुद्धि[illegible]द्यमत्रनोत्पद्यतइत्यत्रपरत्वापरत्वयोरनुत्पादव्याप्तिमाश्रित्यनिर
स्तिं। नचेत्यादिना। आत्मन्यतिव्याप्तिवारणायससमानाधिकरणेति। तत्रैवससामादायातिव्याप्तिवारणायद्रव्यत्व
व्याप्येति। द्रव्यत्वान्यत्वेनापिजातिर्विशेषणीया। तेननद्रव्यत्वंव्याप्यद्रव्यत्वमादायातिव्याप्तिः। अपहृहृतिं। अवि
द्यमानपरिमाणंत्वमित्यर्थः। तेनपरमाणोर्नाव्याप्तिः। क्रियाजनकत्वंचद्रव्यतयामूर्त्तसंयोगिद्रव्यमपिकेचित्

तत्रेति। निरवयवमूर्त्तयेत्यर्थः। चरमत्वे पूर्वत्वादिति। परत्वापरत्वसमानाधिकरणेत्यादिकथितविधक्षितार्थवदित्यर्थः। कालादौ स्वदाभावेनासंभवमाशंक्याह। सर्वमूर्त्तेति। अहं महानितिप्रतीतिविषयपरममहत्त्वस्यगगनपरिमाणादिसाधारणस्यजातित्वसंभवेव्यावर्त्यपरिमाणमयोग्यमिति दिक्पदाहरणमतत्त्वमनुसृत्याह। अपेक्षेति। यद्यप्यणुपरिमाणेषुद्व्यणुकपरिमाणमेवोपपद्यतेत्रिचतुरादिपरमाणुपरिमाणमितिपरमाणावतिव्याप्तिरुक्तोऽथाप्यपकर्षनिश्चयमहत्परिमाणस्यतथात्वेऽध्यं। बहिरिंद्रियेति। आत्मन्यतिव्याप्तिवारणायबहिःपदं। बहिरिंद्रियग्राह्यजातीयसंयोगादिमतिकालादावतिव्याप्तिवारणायविशेषेति। विशेषगुणत्वंचगुणनिरूपणेवक्ष्यतेद्रव्यत्वमादायातिव्याप्तिवारणायगुणेति। लौकिकत्वनिवेशस्यफलमाह। तेनेति। ज्ञातोघटइतिज्ञानेचमवारीक्षतज्ञानेलौकिकीविषयतायाचक्षुरादेस्तत्रलौकिकसन्निकर्षमिथादिति भावः। स्वरूपयोग्यतामवेत्यस्यफलमाह। नचेति। ननुपरमाणुरूपादेर्योग्यत्वेऽनुद्भूतत्वेनतस्यप्रत्यक्षमतआह। महत्त्वेति। लौकिकविषयतयाद्रव्यसमवेतस्यक्षेसामानाधिकरण्यसंबंधेनकारणस्यमहत्त्वस्यपरमाणुरूपादावभावान्नतत्रलौकिकप्रत्यक्षमितिभावः। ननुचक्षुरिंद्रियादिगतरूपादिविशेषगुणानामनुद्भूतत्वेनबहिरिंद्रियग्रहणायोग्यत्वाच्चक्षुरादावव्याप्तिमाशंक्याघटयन्नाह। अथवेति। अत्रकल्पेदेशिकपरत्वापरत्वादायमनस्यतिव्याप्तिवारणायविशेषेति। स्पर्शवत्संमवायेनेत्यस्यसमवायिकारणेत्यादि। सत्तादिकमादायगगनेतिव्याप्तिवारणायद्रव्यत्वव्याप्येति। आ

२।७

काशशरीरिणामित्यत्रमूलेशरीरिपदमात्मपरमित्यभिप्रायेणाह। आकाशात्मभामिति। लक्ष्येलक्षणंग्रहयितुंशब्दज्ञानादीनामध्यात्मवृत्तित्वंक्षणिकत्वंचोपपादयति। आकाशस्येत्यादिना। क्षणिकस्यविशेषगुणस्यानभुपगमादाह। क्षणिकत्वंचेति। घटादिव्यावर्त्तयेत्यत्रतीति। यक्षणवर्त्तीतिक्षणपदंनाश्रयाश्रिमत्परं। तदुत्तरार्थंतिलट्। यक्षणवर्त्ती योविशेषगुणस्तन्नाशयतीत्यर्थः। अत्रनाशयत्रमतिबोधितासंबंधेनयोग्यविभुविशेषगुणनाशस्तत्रस्यसामानाधिकरण्यस्याप्यवहितपूर्वधर्त्तीत्योभयसंबंधेनयोग्यविभुविशेषगुणइतिसामानाधिकरण्येननाशकत्वंबोध्यं। कार्यनाशयद्धेदकेयोग्यत्वानुपादानेआत्मविशेषादिजन्याद्दष्टनाशेव्यभिचारः। योग्यसंयुक्तलौकिकसाक्षात्कारविषयनिर्धर्मकात्मान्तरत्वमतीन्द्रियजातिमूर्त्तत्वंधा रूपनाशेव्यभिचारवारणायधर्मीति। संयोगादिनाशेव्यभिचारवारणायविशेषेति। कारणनाशभेदकेयोग्यविभुत्वेचरूपादीनामभावतोयक्षणोत्पन्नादृष्टसंयोगादिनातत्तीयक्षणेऽपेक्षाबुद्धिनाशःसामानाधिकरण्यसंबंधनियेशान्नाश्यादिनाश्यधिकरणानामिधादीनानाशः। स्वाश्रयावहितपूर्वक्षणनिवेशान्नभुनादीनामुत्पत्तिकालिकेधादिनानाशः। केचित्तु। स्वस्वस्तरद्व्यसंपर्यवसायितयातत्तद्गुणस्यतत्तद्गुणनाशकः। अपेक्षाबुद्धेस्तूत्पत्त्यपेक्षमित्याहुः। एतल्लक्षणेसर्वेयोग्यविभुविशेषगुणत्वेननाश्यतावच्छेदकेयोग्यविभुविशेषगुणत्वंनिवेशनीयं। अपेक्षाबुद्धिनाशेचद्वित्वमत्यक्षविशेषसामग्रीचरमज्ञाना

नेऽपि
शब्दादिना १०
योग्यविभुविशेषगुणः १

ननुससानांसाधर्म्यंजेयंतत्कस्यचैधर्म्यमित्याशंक्याहजेयत्वादिकमिति।धात्वर्थैकादशतेजसोगुणा
जलक्षितिप्राणभृतांचतुर्दशेंद्रियाणांच्योःचक्षुरेवान्यत्रमहेश्वरेष्टोमनससस्थेयेवेति॥१॥प्राचीनस्मो
क्रममनुसृत्यधात्वर्थानुगुणानाह।मूलेस्पर्शादयोष्टाधिष्ठि।स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वान्यष्टौवेगस्यसंस्कारस्यैतियावद्गुणाइत्यर्थः।तेजसोगुणानाह।स्पर्शादयोष्टाधिति।अपांगुणा
नाह।स्पर्शादयोष्टाधिति।पृथिव्यागुणानाह।स्नेहहीनाइति।एते।अर्थाहितमूर्तिकाः।आत्मनोगुणानाह।
बुध्यादिषट्कमिति।बुद्धिःसुखदुःखेच्छाद्वेषप्रयत्नाःसंख्यादिपंचकंसंख्यापरिमाणपृथक्त्वसंयोगविभागाः।
कालदिशोर्गुणानामेवाभावादेकत्वमेवाह।संख्यादिपंचकमिति।आकाशस्यगुणानाह।शब्दश्चेति।तथाचाका
शस्यशब्दःसंख्यादयःपंचैवंषड्गुणाइत्यर्थः।ईश्वरस्यगुणानाह।संख्यादयइति।अत्रनित्याः।ईश्वरपरिमाण
मपेक्षमाणाभावाः।नचद्व्यत्वेसतीदमनुमानमितिवाच्यं।अप्रयोजकत्वात्।ईश्वरेद्रव्यत्वसत्वेमानाभावात्।
अतएवतत्रसंयोगविभागयोःसत्वेपिमानाभावः।पृथक्त्वस्यगुणत्वमेवनिरस्तं।यथाईश्वरेसुखंतथा
ज्ञेयंस्फुटीभविष्यति।एवंचसंख्यादीनांषण्णामपीश्वरस्यगुणाइत्याहुः॥ इतिश्रीक्षीरस्वा २०
मिविरचितायांपदार्थप्रकाशेप्रथमंवर्षिछेदः॥ ॥गंधहेतुत्वंपाकादौगं
धमतोव्याचष्टेगंधेतिगंधवद्द्रव्यत्वव्याप्यजातिमत्त्वमर्थस्तेनसुरभ्यसुरभिकपाटादौनेंद्रियनिर्ग्राह्यघटे

नाभावेःअयंतेननजन्यादायतिव्याप्तेःद्रव्यत्वव्याप्येत्यनेननसत्त्वेसत्तासमवायस्यादायसा।अथाजातिपदोपा
दानाज्जन्यपृथिव्यन्यतरसमवायेनगंधवत्त्वंपृथिवीनिरूपितकालिकसंबंधेनगंधवत्तिसमवाय
संबंधावच्छिन्नपृथिवीनिरूपितकालिकसंबंधावच्छिन्नपृथिवीनिरूपितकालिकसंबंधाधिकरणद्रव्यत्वादिमति
जन्यादौनातिव्याप्तिःप्रमाणोपन्यासार्थेति।यद्यपिपृथिवीत्वस्यप्रत्यक्षत्वात्तत्रप्रमाणांतरवैयर्थ्यात्तथाप्य
योग्यसाधारण्येनप्रत्यक्षासंभवात्तत्साधारण्येनपृथिवीत्वसिध्यर्थंतदुपन्यासइतिभावः।अन्यथा
गंधत्वावच्छिन्नंप्रतिपृथिवीहेतुत्वानंगीकारे।आकस्मिकत्वापत्तेरिति।नियतकारणानियम्यत्वापत्तेरि
त्यर्थः।तथाचकार्यमात्रउद्देशेगंधेनस्यकार्यतावच्छेदकतानुरोधेनतदवच्छिन्नेपृथिवीत्वेनहेतुत्वमावश्य
कमितिभावः।इदमुपलक्षणं।रूपादिनाशकतावच्छेदकतयापृथिवीत्वजातिसिद्धिर्द्रष्टव्या।प्रतियोगि
तासंबंधेनाश्रयनाशाजन्यरूपनाशंप्रतिरूपसमवायिपृथिवी।समवेतसमुदितरूपोभयसंबंधेन
विलक्षणतेजःसंयोगत्वेनहेतुर्नपृथिवीत्वस्यतादृशनाशकतावच्छेदकसंबंधेघटकत्वात्।आश्रयनाश ●नाशक
जन्यरूपनाशेव्यभिचारवारणायाजन्यांतेनाशीतिशेषणं।वह्निसंयोगेनपटरूपनाशेव्यभिचारवारणाय स
मवेतेतिनस्यनाशकतावच्छेदकसंबंधत्वमेवेशः।तेजोरूपेप्रतियोगितासंबंधेनतादृशरूपनाशव
भिचारवारणायतद्घटकतयापृथिवीसमवेशः।रूपसमानाधिकरणरसगंधवत्तियोगितासंबंधेनतादृश

रूपनाशोत्पत्तिरारभ्यते रूपस्य नाशकत्वादवयवसंबंधे सत्येवेत्यवधारणं रूपनाशोत्पत्तिं च कालविशेषणतया बोध्यं। स्यात्समवायिसमवेतत्वविशिष्टरूपत्वस्य संबंधत्वे रूपत्वविशिष्टस्य समवायिसमवेतत्वमादाय विनिगमनाविरहेण नाशकाभावद्वयापत्तेरित्यलं प्रसक्तिभागः। एतेन पाकजगंधे तेजसः कारणे येनापाकजेन सुरभ्यादिगंधावयवगतसुरभ्यादिक्रियामजन्येनगंधेनेत्यधिकरणभावे मानाभावात्तदधिकरणं यंनजातिरिति प्रत्युक्तं। ननु गंधवत्त्वस्य एटधिकरणत्वे पाषाणादौ गंधमूत्पन्नेध्यासिरिति शंकानिराकरणं स्यात्। नचेत्यादिना तत्राह। पाषाणादावपि। एटधिकरणत्वेनैव निर्वाहः। गंधसत्वात्। गंधानुमानात्। ननु पाषाणादौ गंधसत्वे। नुपलंभोनस्यादित्यत आह। अनुपलब्धिरिति। अनुद्भूतत्वेनानुद्भूतत्वेन। ननु पाषाणस्य एटधिकरणत्वे एवमानाभावो नित्यगंधवत्त्वं सत्त्वं तत्र एटधिकरणत्वसाधनायेत्यभिप्रायमारयति। कथमन्यथेत्यादिना। अन्यथा पाषाणादेरेटधिकरणत्वानंगीकारे। तद्दृष्टांतपाषाणभस्मनि। यद्यपि पाषाणेटधिकरणत्वाभावे। लक्ष्यतादवस्थ्यं गंधवत्त्वं लक्षणं नाव्याप्तमिति व्यर्थं तत्र गंधसाधनायपरिश्रमस्तथापि धर्मिस्वरूपसिद्ध्यर्थं तत्रेत्यंशो ध्येयः। पाषाणभस्मनि गंधः प्रत्यक्षसिद्धस्तेनतत्रेटधिकरणत्वमंगीकरणीयं। ततश्चभस्मारंभकावयवेष्वपिएटधिकरणत्वं सिद्धिरस्तत्रैवपाषाणारंभकावयवेष्वपिएटधिकरणत्वमंगीकरणीयं। भस्मारंभकावयवपाषाणावयवयो

३०

३०

रेक्यादेवंचपाषाणस्यापिएटधिकरणत्वसिद्धिरित्यभिप्रायः। तदेवविशदयति। भस्मनोहीति। एतेनपाषाणद्रव्यारब्धभस्मन्यपि अनुद्भूतगंधापत्तिवारणायपाषाणावयवेषुपाकांगीकारआवश्यकः। एवंचपाकोत्पादितगंधएटैः पाषाणावयवैरेवतद्भस्मारंभः सिद्धयेन्नतैरेवपाषाणारंभइति। अन्यथातद्भस्मनोन्यावयवसंगतिरितिपरास्तं। तथासत्यविद्रूपणं। स्यात्पाषाणेएटधिकरणत्वंसिध्यतेनगंधानुमानसंभवादिति। यद्द्रव्यमिति। अत्रध्वंसप्रत्यक्षेघटोपादानोपादेयाभिचारवारणायप्रथमंद्रव्यपदं। अथयापटध्वंसजन्यरूपध्वंसेभिचारवारणायतत्। मिथ्याज्ञानध्वंसजन्येकार्यग्रहेनदीनमतेदंउत्पन्नरूपदुष्कर्मजन्यघटेभिचारवारणायद्वितीयंद्रव्यपदं। प्रतिबंधकद्रव्यत्वंतात्पर्यजन्येद्रव्येभिचारवारणायध्वंसपदं। ध्वंसत्वेनचैकजनकत्वंविवक्षितं। तेनमांसमेतन्मतिबंधकसंसर्गाभावस्यहेतुत्वेविनश्यतिः। ध्वंसजन्यत्वंचादृष्टद्वाराधिवक्षितं। तेनशालिग्रामध्वंसजन्येनारकीयशरीरेनभिचारः। नचदुग्धध्वंसजन्येदधिदुग्धावयवजन्यत्वंस्वीकरेदधोविदुग्धात्पत्तिदुग्धावयवेदधिनजन्यतइत्यंगीकरणीयं। तथाचदध्यभिचारइतिवाच्यं। दध्नोद्व्यणुकादिरिनेदुग्धध्वंसजन्यत्वास्वीकारात्। द्व्यणुकरूपदुग्धध्वंसजन्यत्वेपितस्यनतत्रभिचारः। नदुपादानपरमाणुजन्यत्वस्यदध्यसिद्धत्वात्। नचदुग्धपरमाणुजन्यत्वेनदध्नोदुग्धात्पत्तिरितिवाच्यं। दुग्धपरमाणोर्दु

ग्धत्वाभावात्। द्रव्यत्वव्याप्यव्याप्यजातेः परमाण्वनित्येत्वमानाभावात्। अन्यथा परमाणुत्वरूपदुग्धजन्यत्वेन
दध्नि दुग्धत्वापत्तिवारणासंभवात्। दुग्धत्वदधित्वयोः परमाणोर्जातिसंकरप्रसंगादिति। व्याप्तिज्ञानार्थं दृष्टान्त
माह। दृष्टं चैतदिति। मूले नानारूपवत्त्वं लक्षणान्तरमुक्तं नत्वलक्ष्यमित्यादयन्ति। मुक्तेत्यादिना। अलक्ष्ये लक्षणा स
संभवमित्यादयन्ति। नन्विति। रूपवद्द्रव्येति। रूपवद्द्रव्यवद्वृत्तिसत्तारूपजातिमत्त्वगुणादयंतिव्याप्तिवारणायद्रव्य
व्येति। द्रव्यत्वव्याप्येजलत्वादिमत्त्वेजलादयंतिव्याप्तिवारणायरूपवद्द्रव्यवद्वृत्तीति। जलदृष्टिव्यतिरि
क्तादिरूपधर्मवादायजलादयंतिव्याप्तिवारणायजातीति। अपेक्षाबुद्धिविशेषविषयत्वरूपहित्वादिघटितत्वे
नगौरवादाह। रूपनाशेति। अत्रापिमतिपदव्याख्यानेः पूर्ववद्धेयम्। वह्निरसस्तेजसीतिमूलेऽरसपदं
रूपंमकाशयति। मधुरेत्यादिना। ननुयत्रनानारसानांसन्नाशस्तत्राप्यास्वादेरसआह। अत्रापीति। ननुगंधस्य
द्विविधोमतइत्यनेनद्विविधगंधवत्त्वंदृष्टिव्याख्यानंप्रदर्शितं। तत्रामुरभिद्विविधांशस्यैव्यर्थोविशेष
आह। यस्मादिति। यस्मात्यागंधोद्विविधस्तिष्ठतीतिसूत्रयितुमुक्तंनत्वलक्षणंद्विविधस्यापिमध्येशब्देनार्थः।
गंधद्वैविध्यंमकाशयति। द्वैविध्यंचेति। अनुष्णाशीतस्पर्शवत्त्वमित्यर्थादाह। दृश्यंचेति। पाकजस्पर्शवत्त्वमेवो
क्तंचेत्यर्थः। न्यायमतेपाकजस्पर्शाभावइतिपटे। वैशेषिकमतेपाकजस्पर्शस्यपरमाणुष्वप्यविद्यमानत्वादय
मपिनिर्भागसिद्धिमाशंक्यनिषेधति। यद्यपीति। पाकजस्पर्शेति। पटादादिमात्रिपदेनयौगिकमतेऽय

मपिमात्रपरिग्रहः। सत्तारूपजातिमादायगगनादयंतिव्याप्तिवारणायद्रव्यत्वव्याप्येति। द्रव्यत्वसमानाधिक
रणसत्तामादायेतिव्याप्तिवारणायव्याप्यभागः। स्पर्शसमानाधिकरणजलत्वादिकमादायजलादयंतिव्याप्ति
वारणायपाकजेति। पाकजद्रव्यत्वसमानाधिकरणतेजस्त्वमादायतेजस्त्वेतिव्याप्तिवारणायस्पर्शेति। अ
लब्धिव्यतिरिक्तत्वाद्यादायजलादयंतिव्याप्तिवारणायजातीति। अत्रचटत्वंरूपत्वावच्छेदक
कुक्षौनिक्षिप्तंसत्दधिकरोतीत्यादौतथादर्शनात्। अत्रचटत्वंरूपत्वावच्छेदकंतस्यनहेतुत्वमितिवाच्यं। हेतुः साध्यसमानाधि
करणइतिलक्षणेविहेतुमात्रसाध्यव्यापकनिरूपितबोधस्यानिष्पन्नत्वेनपक्षतावच्छेदकत्वेविहेतुत्वविरोधात्। व्य
तिरेकव्याप्तेरगमकतोयंतुसुतरां। अणुत्वस्यद्व्यणुकेविसत्तादाह। परमाणुरूपेति। नोद्वैः शंकते। ननुअयंघ
टइत्यादिप्रतीतिरेवतत्रप्रमाणंभविष्यतीत्यतआह। परमाणुपुंजेरेणवइति। विलक्षणसंस्थानविशिष्टैःपर
माणुभिरेवेत्यर्थः। उपपत्तेरिति। अयंघटइत्यादिप्रतीतेरेवपपत्तेरित्यर्थः। तत्समूहस्य। परमाणुसमूह
स्य। तत्रदृष्टांतमाह। यथेति। तत्समूहस्य। केशसमूहस्य। अनुपपत्तेरिति। परमाणूनामनेकत्वादणुत्वाभ्यु
पगमात्। इतियदुपपत्तेरिति। तत्रयथाधान्यसमूहेएकत्वादेकइतिप्रतीतिः। एवंसंयोगविशेषस्यैवमहा
त्मरूपतयामहानितिप्रतीतिस्तथापरमाणुपुंजेष्वपीतिभावः। प्रसक्तेत्यादिना। तथाचस्वभावतोऽयोग्यानां

परमाणूनांपरस्परसंयोगमात्रेणयोग्यद्रव्यंनसंभवतीतिभावः। दूरस्थकेशरूक्षत्वभावतेनातींद्रियइतिचदू
रुद्दष्टांतस्यचेत्यादिना। दूरस्थकेशादीति। तस्यदूरस्थकेशस्य। एवकारश्चसंछद्यावयवसं
न्निधानपदेनान्वेति। तथाचसन्निधानतएवतस्यप्रत्यक्षत्वमितिभावः। तथाचदूरत्वंस्वप्रतिबंधकत्वाद्दू
रीभावमप्रत्यक्षत्वमात्रंतस्यनतुस्वाभाविकमप्रत्यक्षत्वमितिभावः। दुष्प्रत्यादिति। क्षणध्वंसादिनांतेषा
मतेपरमाणूनामनुत्पत्तिस्वीकारादितिभावः। अन्यथाऽदृष्टस्यदृश्योपादानत्वेतत्रतादृग्रहरूपनास्ति
स्थलेतदंतःपातिभिः। अतितप्ततेक्षातःपातिभिः। स्वभावात्। कारणनैरपेक्ष्यात्। उद्भूतरूपादीति।
आदिनाऽनोद्भूतस्पर्शग्रहः। तदभावेमहत्तोद्भूतरूपाद्यभावे। तदभावादिति। महत्त्वाभावादित्यर्थः। अव
यविकमतानुयायिनः। परस्परविभक्तेपरमाणूनांमहत्त्वाभावादप्रत्यक्षत्वेविपरस्परसंयुक्तानांपुंजा
त्मकानांतेषांयत्प्रत्यक्षत्वंतदसिद्धमित्यर्थः। नचमहत्त्वाभावएवबाधकः। परस्परविश्लेषणसंयोगस्यैवमहत्त्वरूप
स्यप्रत्यक्षजनकत्वात्। नचपरमाणूनांनित्यत्वात्घटादाविवनाशयोःप्रतीत्यनुपपत्तिरितिवाच्यं।
तेषदार्थमात्रस्यैवक्षणिकतयापरमाणूनामुत्पत्तिनाशयोःस्वीकारात्। नचपरमाणुपुंजेषुघटत्वांगी
रेफपाकात्घटइतिप्रतीत्यनुपपत्तिःपरमाणूनांपाकजन्यत्वाभावादितिवाच्यं। तन्मतेपाकस्या
विपरमाणुपुंजरूपतयाघटरूपपुंजेषुपाकरूपपुंजजन्यत्वस्वीकारात्। पुंजापुंजोत्पत्तिरितितेषां

सिद्धतादित्याहुस्तन्नघटइत्यादिप्रतीतिविषयतयाअनेकपरमाणुपुंजत्वेनगौरवाद्यावयवादतिरिक्तव
यविसिद्धेरितिदिक्। बस्सर्वयोरपीति। अविच्छेदसाम्यप्रसंगइत्युत्तरंसंबध्यते। तेनरद्यणुकस्यसाव
यवत्वेमहत्त्वापत्तिःसमुद्भाव्यते। साम्यापरिमाणतारतम्याभावः। परिमाणकारणीभूतोयाअव
यवसंख्यायाःउभयत्रसाम्यादितिभावः। नचमेर्वादयोनसर्षपत्वादिव्यपरिमाणवंतः। अतुसर्षपाद्य
वयवानांसर्षपत्वादिव्यपरिमाणवत्वेमिसवयवपरिमाणविशेषादेवइतिवाच्यं। मेर्वादयवयवसर्षपाद्य
वयवोरप्यनंतावयवत्वेनतत्परिमाणतारतम्याभावस्यापादनीयत्वात्। नचमेरुसर्षपावारुभयव
गतमहत्त्वाख्यसंयोगविशेषात्तद्विशेषइतिवाच्यं। अवयविनोवयवसंख्यादिशेषनियम्यत्वेन
संख्यादिशेषाभावेतद्विशेषानुपपत्तेरिति। ननुतथाविधिमात्रावयवस्यनिरुद्धेमानाभावइत्यतआह।
यत्रेति। असमवेतकार्योत्पत्तिप्रसंगइति। असमवेतावयवकार्योत्पत्तिप्रसंगइत्यर्थः। ननुतत्रनि
रुद्धावयवत्वेपरिमाणमित्यतआह। महत्परिमाणेति। चाक्षुषद्रव्यत्वादिति। अत्रात्मनिष्प्रति
घातायचाक्षुषंपरं। घटाभावेष्वप्रतिघातायद्रव्यं। तदवयवसिद्धाविति। असरेण्ववयवसि
द्धाविसर्थः। तदसिद्धेरितिभवत्यवधारणासिद्धेरित्यर्थः। अत्रनव्याः। असरेणोरवयवाःसावय
वानुमानयोरुभयोरप्ययोजकत्वेनाऽनुद्भूतत्वमतिमहत्संकारणंतथाचनु

त॰ ५

टोमहत्त्वमाध्यर्थकं। तत्राध्ययसंख्याजन्यमित्यध्यर्थदिनानोपपद्यतइत्यनुकूलतर्कसत्त्वान्नाप्रयोजकत्वं
द्व्यणुकेसाधकानुमानस्येतिभाव्यं। त्रसरेणुमहत्त्वस्यनित्यत्वस्वीकारेणाऽतर्कानवतारात्। नचाणुव्यवहार
स्याणुपरिमाणनिबंधनत्वात्तदाश्रयद्व्यणुकेऽपिद्वित्वादयस्तीतिवाच्यं। तस्यापहरणनिबंधनत्वात्। महत्
त्वमहत्त्वादणुव्यवहारात्। नचैवंत्रसरेणुजन्यत्वयथेतिवाच्यं। विशकलितेषुघटद्रव्यारं
भकसंयोगनाशेनघटनाशात्। नचैवंसतिघटंद्रक्ष्यतीत्यादिप्रतीतिरयथार्थेत्यपरपरयात्रानामितिवाच्यं। सर्व
त्रसंक्षाद्यसंबंधविषयत्वेपरपरासंबंधविषयत्वंत्वनयोरर्थादित्याहुः। ननुपरमाणुद्व्येणद्व्यणुकं
नोत्पद्यतेतत्रसन्निहितपरमाणुद्व्येनद्व्यणुकंद्व्येणद्व्यंतरंसन्निहितंद्व्यणुकेत्र्यणुकं
प्रतिबंध्नातीमाणाभावेनतादृशद्व्यणुकेपरमाणुद्व्येद्व्यणुकद्व्येनद्व्यंतरंसन्निहितंत्र्यणुकं त्र्यणुकं
अत्रेदंचिंत्यं। त्रिभिःपरमाणुभिरेवद्व्यणुकमस्तुपरमाणुभ्यामनारभ्यस्तीतिनाद्व्यणुकाभ्यामना ३३
रभ्यमानाभाव्यं। फलबलेनत्रयाणामेवयुगपद्द्व्यारंभकसंयोगकल्पनात्। वस्तुतोगणाक्षरंधे
र्यमानानांद्व्यणुकत्र्यणुकन्यायेनत्र्यणुकद्व्यारंभ्यत्वेलोघवादिति। मूलस्थस्यदेहमिंद्रियविषयस्तथे
त्यस्यत्रेंद्रियहेतुपरत्वंसंघयितुमर्थमाह। साधारणस्त्वित्यादि। योनिजं। शुक्रशोणितसंयोगजन्यं। पर २
तद्धिजरायुजमिति। गर्भथेष्टनचर्मपुटवेजरायुः। मानुषादीनामित्यादिनाषण्णामपि

गर्भाशयोजरायुःस्यादित्यमरः।

चरंद्रव्यग्रहः। सर्पादीनामित्यादिनाविहगपरिग्रहः। स्वेदजमुदाहरतीति। हरिद्रायाद्याइति। तच्छरीराणामु
त्पत्तेरधर्मविशेषसहितेभ्योणुभ्यएवस्वीकारादितिभावः। उद्भिज्जादिकमित्यादिनादेवादिशरीरंप
रिग्रहः। तच्छरीराणामुत्पत्तेर्धर्मविशेषसहितेभ्योणुभ्यएवस्वीकारादितिभावः। तेषांमयोनिजत्वे
चागमएवशरणमाश्रयणीयः। तथाहिब्राह्मणोमानसंसामान्यादयंचुआइत्यादिमाणंयोनिंविनाशरीरमित्यत्रयोनिपद
कारणमात्रपरं। शरीरपदंमानुष्यदेहपरं। गंधवीत्यादिनाम्लेच्छरूपपरिग्रहः। कूदोष्मादे
रित्यादिनाम्यूहथकाशपरिग्रहः। कूदःक्षरणं। स्वेदइतिधातुः। उष्मापाकः। औष्ण्यमितिधातुः। तत्र
शरीरसंबंधेनपुष्टयादेरुपादिपरार्थत्वानुमानेअनुष्णाशीतस्पर्शद्रव्यंक्रियाभवेत्कालो
मुख्यादायन्नादिगमप्तिसंबंधः। ननुकथंतर्हिशरीरेपांचभौतिकत्वंव्यवहारश्चतआहतेनेति। शरी
रस्यपार्थिवत्वसाधनेनेत्यर्थः। एवंचशरीरेपांचभौतिकत्वव्यवहारोनेंधनेभक्तोपादानकत्वनिबंधनः
किंतुपंचभूतजन्यत्वनिबंधनस्तत्राप्येकैकस्योपादानत्वंतत्तन्निमित्तत्वमितिविवेकः। किंतुचे
ष्टेति। चेष्टायंजातिविशेषश्चेष्टतइतिप्रयोक्षस्सिद्धः। नन्वेवंशरीरत्वमेवपृथिवीत्वादिव्याप्या जातिश्चे
ष्टायंचव्याप्यमितिवाच्यं। पृथिवीत्वादिनासकरेणपृथिवीत्वादिव्याप्यानकेशरीरत्वेयुक्तः। यु
गपद्रथादध्यात्मिकेति। अध्यात्मिकवायुःप्राणाख्यःशंकतेतत्रेतिअग्नक्षतेतिअग्नक्षतयो

र्थिभागविशेषविशिष्टावयवयोः संश्लेषणं। आदिमाद्वृष्टिसंग्रहः। वृष्ट्याद्यवयवोपचयः। तदुभयनादि
ति। आध्यात्मिकवायुसंबंधानुमितेः। ननुभौम्नक्षतसंरोहणादिहेतुधोः प्राणत्वेमानाभावइति चेन्न। न
र्मदातीरसंजाताः सरलार्जुनपादपाः। नर्मदायास्तोयस्पर्शाद्वेवियांतिपुरांगतिं। गुरुं हरस्यदुष्ट
स्यधिगंनिर्जिग्यषादतः। स्मशानेजाग्यतेरुद्रः यंकंगध्रोपसेवितइत्यागमस्थेयत्नमानत्वात्। अं
गोपयधिष्ठानेति। इत्यानारभकद्रव्यत्वेनत्यर्थः। मतशरीरचेष्टायाअंभाधेनाध्यासंहितआह। अथ
वेति। घटमादायघटइतिव्यभिचारणायचेष्टाधदिति। हस्तादाधतिव्यभिचारणायासावयवीति।
नचहस्तत्वादिकंनजातिः पृथिवीत्वादिनासंकरादिति वाच्यं। पृथिवीत्वादिव्याप्यनानाहस्तत्वागीका
रात्। पृथिवीत्वरूपतादृशजातिमतिघटादावतिव्याप्तेर्लक्षणांतरमाह। अंसावयवीति। अंसावय
विमात्रवृत्तीत्यनेनद्रव्यत्वजातिव्युदासः। चेष्टाधदृत्तीत्यनेनघटत्वादिव्युदासः। चेष्टाहिताहितसं
सिपरिहारार्थक्रियाग्राह्या। नतुस्पंदनमात्रं। घटादावतिप्रसंगात्। ननुदेवत्वादिरूपजातिमादायछल
क्षणसमन्वयइतआह। जलेवेति। देवत्वस्यापीति। अचिनोतीहत्यपरिग्रहः। जातित्वाभावादिति।
जातिसांकर्यादितिभावः। जातिसांकर्यस्यादोषत्वेदेवत्वशरीरत्वादेर्नाजातित्वागीकारेणदेवत्वश
रीरत्वजातिमादायेयंलक्षणसमन्वयइतिध्येयं। रूपादिमध्यइति। रसगंधस्पर्शादिपदार्थः। नवश्रा

द्धगंधकजलेमनसिचयभिचारधारणायेयकारः। तदानेस्फुरत्वस्यापिघ्यंजकत्वान्नदो
षः। घ्राणेंद्रियगंधत्वाभिव्यंजकत्वादेत्यसिद्धिधारणायहेतोर्मध्यात्। नचासिद्धिरवधिशेषणा
निरर्थकमितिवाच्यं। यभिचारज्ञानदूयहेत्वप्रसिद्धयपिव्याप्तिज्ञानाभावेनव्याप्तिग्रहोपपत्तेरप्य
सिद्धिधारकविशेषणोपादानस्यसर्वसिद्ध्यर्थत्वात्। तदर्थत्वात्। हेतुधाध्यघटकमध्यातपदसमभि
व्याहृतैवकारार्थकात्। तथाचदृष्टांतस्थीयरूपादिध्यंजकेघटादावसिद्धिधारणायपरकीयत्वंरू
पादेर्विशेषणंदेयमितिभावः। तस्येति। नवश्राद्धगंधध्यंजकजलस्येत्यर्थः। नचनवश्राद्धगंध
ध्यंजकजलेनयेनसस्फुरत्वेनाभिव्यंजितस्तत्रजलविशेषेनैवांतर्भवतीतिवाच्यं। परकीयरूपादिवि
षयकसाक्षात्कारस्वरूपायोग्यत्वस्यविवक्षितत्वात्। नवश्राद्धगंधध्यंजकजलेपिरसध्यंजकताव
च्छेदकजलत्वस्यसत्वादिति। परकीयेतिविशेषणाप्रवेशेनलाघवादाह। महेति। तदानेहेतुमाह।
धारणापनीतेति। इदमत्रबोध्यं। रूपाद्यध्यंजकत्वेसतीत्यस्यहेतुत्वेतात्पर्यं। शब्दोद्यध्यंजकत्वेसतिगंध
ध्यंजकत्वस्यनवश्राद्धगंधध्यंजकोदकेव्यभिचारेतत्रैवकरुक्तोस्यभिप्रायः। तत्रहेतुषु
रूपरसस्पर्शनिंपरकीयविशेषणं। नचप्रथमहेतौनवश्राद्धगंधध्यंजकजलेव्यभिचारः। दुर्लक्षरम
णीं। ध्यंजकत्वात्। नचतदीयेहेतौतत्रव्यभिचारः। एतदस्परसेनापिव्यहेतिविकल्पांतरमणयनाह। त

क्रमेणागतं

अणुत्वादिपरकार्यत्वविशेषणाद्घटिसंहेतुत्वमिति। तत्राघ्राणेंद्रियसन्निकर्षे। इंद्रियत्वेनजातिस्तेजस्त्वादि
नासंस्कारात्। किंतु शरीरेतरेत्यादिनावक्ष्यमाणबोध्यं। ननुविषयत्वेनजातिः। सामान्यादेस्तादृक्षुद्धि
क्षणमात्रं। उपभोगेति। यद्यपिसाक्षात्तोमसाधनत्वंद्व्यणुकादयस्यात्साक्षात्सरपरासाधारणजातेस्साधनत्वं
परमाणावपीतिद्व्यणुकादि। अत्राऽऽकांक्षितमिति ग्रंथेविरोधस्तथापिसाक्षात्सरपरासाधारणभोगसाधनत्वंवि
क्षितं। परमाणुरपिविशिष्ट। कार्यरूपदृष्टक्रियाएवंविधप्रकारणविभजनाकार्यदृष्टिधीविष
यत्वद्व्यणुकादीत्यादिनाऽनुवृत्तिदुर्वारेणग्रंथविरोधःभवतीति। तदुपभोगंसाक्षात्सरपरयाजनयत्येवेति।
कार्यजातमित्यत्रजातिपदंसंपातायात्। अदृष्टाधीनमिति। अत्रकार्यमात्रंप्रत्यदृष्टस्यहेतुतानसमवायस
बंधेनघटादिधिकरणकपालादिसमवायेनतद्भावाध्यक्षिचारात्। यतु। स्वसमवायिसंयोगनादृष्टंकार्य
मात्रेहेतुरिति। तन्न। शब्दरूपकार्याधिकरणगगनेऽदृष्टसमवाय्यात्मसंयोगाभावेनध्यक्षिचारात्। परंतु
स्वसमवायिसंयुक्तसंयोगेनतस्यहेतुतावाच्या। इदंतु बोध्यं। अदृष्टस्यकार्यमात्रंप्रतिहेतुतानसाक्षात्। न
हिसामग्रीसमर्थानेऽदृष्टविलंबेनकार्यविलंबोदृष्टायेनसाक्षाहेतुः स्यात्सरंतुसामग्रीसंपादकतया
प्रायःपरंपरयेतदुपयोगः। क्वचिन्मेघसंचारादौसाक्षादेवतद्धेतुरन्यथासामग्रीसंपादकत्वस्यैवानुप
पन्नेरिति। एतदर्थमेवसाक्षात्सरपरासाधारणजन्यत्वाधकर्मधीनपदमुपात्तं। यददृष्टाधीनं। यस्मरू
पाद्यदृष्टाधीनं। तत्। तत्कार्यमित्यर्थः। तदुपभोगसाधनंतत्पुरुषस्योपभोगसाधनं। तेनद्व्यणुकादि

कार्यस्यतत्तत्पुरुषोपभोगसाधनत्वेनानन्वयेसर्वस्यैवविषयत्वेनशरीरेंद्रियविषयभेदेनदृष्टिर्व्यर्थास्यादि
त्यआह। शरीरेंद्रियेतिः। मूर्तिरिष्टधीग्रथः॥७॥ जलत्वजातौप्रमाणमाह। स्नेहेति। कारणतावच्छेदकतयाधर्मसि
द्धौबाधकाभावात्तस्यचजातित्वमितिभावः। नित्यद्रव्यवृत्तिधर्मस्यकार्यतावच्छेदकत्वाभावेनस्नेहत्वस्यकार्यतावच्छेद
कत्वंनसंभवतीतिशंकतेयद्यपीति। तथाकार्यतावच्छेदकत्वे। यस्तत्तत्। नित्यसाधारणधर्मस्यकार्यतावच्छेदकत्वेद
बाधाज्जन्यपदंनदेयमेव। ननुयथारण्यस्यदादेःफलानुपधायकंकारणतावच्छेदकतयादत्वादिकंजाति
स्तथाजलविभाविष्यतीत्यतआह। तस्येति। दंडादेःस्वरूपयोग्यतायानकाक्षितिः। तस्यानित्यत्वेनफलोपधायकता
भावादितिभावः। अन्यजलत्वंजातेः। अन्यजलमात्रवृत्तिजातेःतदधिकरणेति। अन्यजलत्वजात्यवच्छिन्नेत्यर्थः।
ननुवंजलसाध्ययाधिनिजलत्वेनस्यादितिवाच्यं। जलस्यासाधुपध्यनुपगमात्। ननुजलत्वावच्छिन्नप्रतिसंबंधा
यसंबंधेनस्नेहस्यैवकारणत्वमस्त्विति। रूपजातिकल्पनापेक्षयालाघवादितिचेन्न। जलत्वावच्छिन्नप्रतिसंबं
धेनस्नेहस्यैवकारणत्वेतत्सिद्धौतस्यद्रवित्वेनिर्वक्तव्यत्वेनिगमनाविरहादितिरूपजातिसिद्धेः कुसमादायकल्पनीयेनविनिगम
नाविरहाभावादिति। केचित्तु। धूमादिकंप्रत्येंधनादेःकारणत्वंनिर्विवादं। आर्द्रेंधनंजलसंयुक्तत्वं। तथाचजलसं
युक्तेंधनत्वेनेंधनसंयुक्तजलत्वेनवाकारणत्वस्यत्वेनविनिगन्नाविरहाज्जलेंधनयोःपार्थक्येनकारणतावच्छे
दकतयाजलत्वजातिसिद्धिरितिभाहुः। परंतु। स्यूलजलत्वंनित्यमत्यसंसिद्धजलत्वरूपजात्यवच्छिन्नसमवा
यिकारणतावच्छेदकतयापरमाणुसाधारणजातिसिद्धेः। कार्यतावच्छेदकारणतावच्छेदकयोरेक्यस्यभाव

न्नित्यसाधारणधर्मस्यकार्यतावच्छेदकत्वेदोषाभावाच्चेत्याहुः। नत्विति। दृष्टिर्व्याप्यादायतिव्याप्तिरितिशेषः। मधुकूरूपस्यलक्षणत्वेपिनक्षतिरित्यपिमेस्वाहः। अथवेति। इदंव्याप्यंयायुक्तंरूपजातिमादायव्याप्यवृत्तिप्रसंगात्। रूपंवहतीति। यथाश्रुतंजातिस्तथाग्रेवक्ष्यते। दृष्टिर्व्याप्तिमादायदृष्टिव्याप्तिरितिप्रसंगाद्धारणायनेमित्तिकद्रवत्वंवदन्तीति। साक्षादिति पटत्वादिधारणाय। द्रव्यत्वसाक्षाद्व्याप्यत्वंचद्रव्यत्वव्याप्यव्याप्यत्वमात्रं नतुद्रव्यत्वव्याप्यत्वस्यापितत्रांतर्भावः। रूपवहृत्तित्वविशेषणेनैवरूपत्वादेर्धारणात्तन्निवेशोप्रयोजनाभावात्। यद्यप्यवयवेपिस्थितिरुद्भूतस्यैवरूपस्यानर्घत्वायुक्तः। तेनापिवायुत्वादेर्धारणात्। एवंचद्रव्यत्वंवहृत्तित्वाभावादेवघटत्वादेर्नाधारणंसंभवेद्द्रव्यत्वसाक्षाद्व्याप्यत्वंविनेदंयमितिलाघवंतथापिमूलेयमुकूरूपदिनारूपघटितलक्षणस्यैवोक्तत्वात्तदनुरोधेनमूलविरोधःस्यादितितथानहृतमितिध्येयं। मूर्त्तत्वजात्यनभ्युपगमेनचेदंतेनैवजलत्वस्यद्रव्यत्वव्याप्यमूर्त्तत्वव्याप्यत्वेपिनक्षतिः। जलघटान्यतरत्वमादायघटादावतिव्याप्तिधारणाघजातीति। क्वचिच्छुकूरूपवहृत्तीतिपाठस्तुभ्युकूपदरूपपदेवासंपन्नाभ्यांतारमेवव्याख्यानिरभास्तरभुकूतरूपवत्वेनरूपवहृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदार्थोर्थाद्दृष्टिर्व्याप्तिमादायदृष्टिव्याप्तिधारणायास्तरभुकूतरूपसमानाधिकरणेति। जलत्वस्यभुकूरूपसमानाधिकरणत्वादसंभवइतितद्धारणायभुकूतरेतितेजस्त्वमादायतेजस्त्वेतिव्याप्तिधारणायभ्रमोस्तरेति। ज्ञानत्वेति। यद्यपिद्रो

तेगुणेतिकोशात्कूलंतटोचितं। तथापिद्रोष्यस्यद्रंशिद्रस्यपुद्गिंगत्वात्पुद्गिंगतयानिर्देशः। भुकूरूपव्याप्यादौभुकूपदस्यकूलंतटमेवेति। द्रव्यत्वव्याप्याघटत्वादिरूपजातिस्तांमादायदृष्टिव्याप्तिधारणायतिव्याप्तिरितितेजस्त्वादिजातिमादायतेजादयतिव्याप्तिधारणायमधुरत्वंतीति। आत्मत्वादिकमादायआत्मन्यतिव्याप्तिधारणायस्यद्रंधहृत्तीति। द्रोबंदरंतिदिनावसेयं। ननुजलेनीलरूपाभावेकथंनीलमतादिरतआह। कालिंदीति। स्वसमवायिसंयोगसंबंधेनउपष्टंभकयाधिक्याभागतनीलरूपवतीतिः। कालिंदीजलादाधिक्यमितिभावः। अतएवेति। उपदंशितिसंबंधस्यजलनीलमितिप्रतीतिनियामकत्वादवश्यंधियतीति। तदोपदंशितिसंबंधघटकसंयोगस्यनाशादितिभावः। तत्रजले। तस्य। माधुर्यस्यान्यथा। आम्रयोपाधिकत्वाभावेव्यंजकत्वादिकल्पनंहरीतक्यादिभक्षणोत्तरंतत्रैवमाधुर्यलाभादितिरूपणीयं। कल्पनागौरवादिति। अवयवरसाजन्यपृथिवीसंयोगिसंयोगसाध्यत्वदर्शनादेतदनुरोधमात्रेणजलसंयोगस्यविष्टपिवीरसास्वादकत्वस्वीकारेअतिरिक्तकार्यकारणभावस्यहरीतक्यामधुररसस्यचकल्पनेगौरवादितिभावः। अन्यस्तुजलेमधुररसः। तथापिजंबीरजंबादेरम्लरसस्यापिस्वीकारेबाधकाभावइत्यतआह। दृष्टिर्व्याप्तिरिति। आम्लादिजनकतावच्छेदकत्वादिति। यद्यपिदृष्टिर्व्याप्तिरम्लादिजनकतावच्छेदकंतथापिमधुरजनकतावच्छेदकत्वमप्यस्तीतिनुन्यं। तथापिहरीतक्यादिभक्षणोत्तरंजलेपिमधुरोपलब्धेस्तत्रमधुरस्वीकारस्यावश्यकत्वाज्जलेपिमधुरमतिहेतुसंकल्प्यमतइतिभावः। ननुजंबीरसलिलादावम्लरसप्रत्यक्षाज्जलेनाम्लादिरसेवितुंयद्धेतुसंस्यादतआह।

जलेऽ

जैवोरसादावित्ति। रसमधुरिसंयोगेनजंबीगतामृदादिरसप्रतीतिस्तद्वज्जलइत्यर्थः। नुचेविजंबीरेआम्ल
प्रतीतेस्तत्रआम्लरसावश्यकत्वेनस्वेवतद्वज्जलेपरपरयाप्रतीतिः। हरीतक्यामुमधुरस्याभावान्नहरीतकी गतमा
धुर्यस्यप्रतीतिरितिभावः। कर्कटीभक्षणेनरंजलपानेत्यत्रापिस्वरसोजलेस्यादितितुजलपाना
र्थमविकर्कटयातिस्वरसोपलब्धेः कर्कटीभक्षणेनरसनाग्रवर्तिविलक्षणेतरद्रव्यतिरोधानेनकर्कट्यां
शेऽवस्तुतोनिदाघेघृतीतनिर्मलगंगाजलमाधुर्यस्यापिसिद्धस्यापत्तापसंभवान्मधुररसमित्युक्तं। एतेन
हरीतक्यादेनजलसंयोगेनमाधुर्यमुपघ्नतेयेनैकत्यनागीरवं। परंतुहरीतक्याकषायत्वंमधुररसेविरु
द्धमितिचेन्नजलसंयोगः। ननुतत्तरसांतरस्यफलधर्मत्वादयदिचित्ररूपवह्निरसेमानाभावानु
पविरोधेभनिरसेवहरीतक्यादिरसप्रतीतिस्तत्रअवयवेषुरससत्त्वात्परंपरयत्वयते।तदाक्तजलसंयोगेहरी
तक्यवयवगतमाधुर्यस्यैवांजकद्रव्यस्यवाक्तजलसंयोगेनसंक्रांतावनुमानांतरंप्रमाणमाह। एवमिति। ननुजलसं
योगेघृतादौ शीघ्रमक्षेत्यादिचरणकृतंजन्यजलसंयोगतत्रहेतुत्वमतआह। घृतेति। पूर्वंशीतस्यईदृ एव
क्रमंतत्साधयति। तेजःसंयोगादित्यत्र। जले। विवेचयिष्यतिचपाकोसंभवमुपरिष्टात्। घृतादावित्यादिपदे
नतैलादिपरिग्रहः। जलस्येवस्नेहस्यानंतरस्नाय्वयवसंयोगेनप्रतीयतइतिशेषः। तेनघृतादौसंयोगेनस्ने ३७
हनिरासेन। जलएवेति। स्नेहस्याधोरंविशेषाभावात्स्नेहीनिर्गतः। तदधिष्ठानजलनाशेदृक्तदृश्य
स्यजलत्वेवतद्धिष्ठानजलनाशेदृक्जलत्वमितिभावः। अथैवंहरीत्यापरमाणुत्वाद्वत्र द्व्यणुकज

अथमेकंपरमाणुसाधारणाहेत्वाभमितिजलत्वयोर्भेदेनभेदाग्रहः कृतइतिचेन्नसामान्यतोयोग्यत्वनि
यमेत्यादिति। एवमग्रेपि। तेलादीत्यादिपदेनक्षीरपरिग्रहेनघृतस्यतत्रनेमिनक्रद्रवत्वस्यसमवायेनैव
सत्वात्द्रवेत्यनंतरस्नाय्वयवसंयोगेनप्रतीयतइतिशेषः। ननुतैलेजलसंयोगेतैलस्यदहनानुकूल्येनस्या
दहंजलस्यदहनप्रतिकूलत्वादतआह। स्नेहप्रकर्षेणेति। प्रारब्धस्नेहस्यजलस्यदहनानुकूल्यमेव। अपरारब्ध
स्नेहस्येवतस्यदहनप्रतिकूलत्वादितिभावः। इतिवक्ष्यतइति। स्नेहनिरूपणावसरइतिशेषः। घृतमधदिति।
षष्ठीसमर्थाद्धितीयाभिप्रायेणाह। दधिभावायेत्यर्थइति। एवमग्रेपि। जलीयंशरीरमितिनत्रपार्थिवत्व
मेवैरूपेणधंधोधंतेनजलमात्रेहस्तपादादिव्यवस्थायोजसंभवंविनक्षतिः। ननुतादृशशरीरेमानाभावो
नुपलंभादित्यतआह। धरणीत्यादिति। तत्रश्रुतिरेवप्रमाणमितिभावः। गंधेति। रसेत्यंजनेमनसिप्रमि
तेधारणायगंधाद्यंजकत्वइति। कासारः सरः। करादित्यादिपदात्कूपादिपरिग्रहः। कठिणत्वादिति। कठि
नस्यार्थस्यादित्यर्थः। विलीनस्यतस्येति। सप्तम्यर्थेषष्ठी। धृतंहिलीनंयोस्तामोरितिपाठः। सनुरजुरेव।
विलीनतायाः द्रवेरूपायाः जलस्यव्यंजकत्वादितिभावः। कुविलीनतानैमित्तिकंद्रवत्वमेवतदुक्तमुष्म
णेति। तत्रनजलत्वंजकं। यदिचविलीनेतस्मिन्निस्यस्तस्मिन्भ्रष्टसतीत्यर्थस्तदाविकरकादिनाशोत्त
रंद्रव्यांतरेस्नादासत्त्वेद्रवत्वजलत्वयोःप्रत्यक्षनकरकायानष्टत्वादतआह। यद्द्रव्यमिति। तथाचकरकादि

नाशेषमन्यद्द्रव्यान्तरेऽजलस्यमत्यक्षसिद्ध्यादुक्ष्मास्याकरादिषुद्रव्यत्वसिद्धिरिति भावः। ननु हिमक
रकयोः पार्थिवत्वाभावेऽपि यकाष्ठिण्यप्रत्यक्षत्वमस्त्यत आह। अदृष्टविशेषेणेति॥ इति जलपरीक्षा॥७॥ इत्थं चेति।
उष्णस्पर्शजातिसिद्धेरित्यर्थः। ननु कथं तर्हि जन्योष्णस्पर्शस्याधिकारणविनाशेषु परमाणुषु तेजस्त्वसि
द्धिरित्यत आह। तस्येति। तेजस्त्वस्येत्यर्थः। जलत्वस्येति। यथा यजन्यत्वावच्छिन्नजनकतावच्छेदकतयाज
लपरमाणौ जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतयातेजःपरमाणावपि
जस्स्वरूपजातिसिद्धिरित्यर्थः। इदमुपलक्षणं। समवायेनत्विक्षणानीलोद्भूतरूपावच्छिन्नंप्रतिसमवा
येनतेजःसंयोगत्वेनहेतुत्वेतेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं। चंद्रकिरणादावतिव्याप्तिनिरासायाह।
संग्रहः। तत्रापि चंद्रकिरणादावपि। ननु तत्रापि द्रव्यं उष्णमतीतिः कुतोनेत्यत आह। क्रियेति। तदनुपपत्तिर्ज
लस्यैवेति। चंद्रकिरणानर्गतजलभागशीतस्पर्शेनेत्यर्थः। ननु चक्षुरादिनिष्ठस्योष्णस्पर्श
स्यकेनाप्यनभिभवात्तस्यचक्षापत्तिरत आह। चक्षुरादेरिति। मरकतकिरणादावतिव्याप्तिनिरासायाह
ग्रहः। स्याद्दृश्यं चक्षुर्भास्वररूपमिति मूलं। तत्र चक्षुरिति स्वरूपकथनंभास्वररूपमात्रस्यलक्षणत्वे
भावात्। भास्वररूपजातिविशेषः। सचतेजोरूपमात्रवृत्तिः। चक्षुस्तत्प्राप्यकारीति। ननु रूपादिविषयकद्रव्य
प्रत्यक्षस्याभावात्तद्विज्ञानादेरव्याप्तिरेवेत्यत आह। तेनेति। तेनाग्रहइति। तेनाग्रहेणेत्यर्थः।

DR BHAU DAJI

तत्र संख्यादिगुणानामविच्छेदकत्वंस्यात्। योग्यमात्रवृत्तीत्यभावादिसंग्रहार्थं। अन्यथा यरूपेणयेषां
त्वं। पार्थिवरूपेणपृथिवीत्वेत्यर्थः। यत्तांतरमिति। यत्रेत्यत्रेति। सुवर्णादिरूपतेजस्त्वसामानाधिकरण्यं
यः। एथिव्यवृत्तीति। नैमित्तिकद्रवत्वव्यवच्छेदाय रूपजातिमादायपृथिव्यादावतिव्याप्तिवारणायपृथिव्य
वृत्तीति। पृथिव्यवृत्तिर्योयुक्तादिमादायपृथिव्यादावतिव्याप्तिवारणायनैमित्तिकद्रवत्वव्यवृत्तीति। योयुक्तो
न्यतरत्वमादायवायावतिव्याप्तिवारणायजातीति। परकीयस्पर्शादीतिगंधाधंजकेवादिघटितहेत्वंतरस
त्वेनयादिपदेनगंधादिपरिग्रहः। चक्षुषः परकीयरूपादिव्यंजकत्वादसिद्धिवारणायस्वरूपदं। इहकेचिदा
हुः। चक्षुर्विषयासंबद्धमेवग्राहकं। यद्विषयाग्राहकं स्यात्तदारसनादिवदधिष्ठानसंबद्धंग्रहीयात्। न
चैवं। गोलकासंबद्धग्रहणात्। किंचेयदिचक्षुः प्राप्यग्राहीयात्तत्तोधिकपरिमाणवन्नग्रहीयात्। अथतुन
स्वरंजिकापरम्युछेदेधिनेति। शास्त्रेचंद्रमसोरुत्कर्षापकर्षग्रहणानापत्तिरित्या। गतिक्रमेणप्राप्यग्रहणेक
मणग्रहणस्यात्। ननुतस्यकालमुपलंभः। अनुभवतित्वभीलयत्नेवमन्यत्रशास्त्रेशीतमयूखत्वं। एवंचेत्ता
पकादित्वानुरोधेनगोलकातिरिक्तचक्षुः परेरंगीक्रियते। गोलकस्यचंद्रादिग्राह्यसंभवात्। प्रमाणंचात्रे
गोलकमेवचक्षस्तत्रअनतेजसमितितदसत्। अधिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभायाइवचक्षुषोवि
प्राप्यकारित्वसंभवात्। इथुत्तरग्रहणस्यचगोलकनिर्गतस्यमहतश्चक्षुषःरश्मिग्रंथेनप्रदीपप्रभायाइवोपपत्तेः।

नवच्छेदन
शास्त्र१

स्याधिकरणमाश्रयद्रव्यग्राहिणात्यंगेंद्रियेणाग्निसंयोगादिव्यभिचारात्साक्षान्निमित्तमाश्रयस्तुन्यथा नगृह्यमाणोसिद्धमेव।
तदभिमानस्यकारणस्यनिमित्तस्यैवोपपत्तेः।अग्निंस्योहि तेजसोलाघवादिनाद्रव्येणसंयोगोतिशयोयमाचीनावलक
भूयावयविन्येवभगतिमयूरमालिनिभवनोदरेष्वालोकइत्यभिमानोलौकिकानां।यथाहुः शास्त्रिकाचार्याः।
चक्षुर्वत्संस्कारोपाश्रयाभावेनचक्षुषातादर्थसंसृष्टेनयुगपत्तादर्थग्रहणमितिज्ञायतेचंद्रमसोस्फटिकस्यका
लग्रहणमुपपद्यतएवेति।तन्नशोभनं।चक्षुर्वत्संस्कारोपाश्रयाभावस्यचक्षुषःदृष्टभागेपिसत्यादृष्टभागस्थित
पदार्थग्रहणापत्तेः।दृष्टदेशस्थाद्यालोकैकचक्षुरत्वादेमानाभावइतिचेदृदृष्टस्याद्यालोकेरवितदुत्पादेमा
नाभावः।तदनभ्युपगमेविचाक्षुषोपपादनस्यानुपदमुक्तत्वादिति।आद्यमादूह।अथचेति।तेजसत्वेहिमानमि
ति।सुवर्णं।पार्थिवं।नेमित्तिकद्रव्यत्वादित्यनुमानेनपार्थिवत्वसाधकस्येयत्तादित्याशयः।समाधत्ते।तेति।सुव
र्णमिति।नचायंतरूपद्रव्यात्मकस्यसुवर्णस्यपक्षत्वेबाधः।तेजससुवर्णस्यानुमानात्सूर्यसिध्यापक्षा
सिद्धिः।धर्मशास्त्रेपीतिमद्द्रव्येविसुवर्णपदप्रयोगेनतस्यापिसुवर्णपदाभ्यत्वस्यपक्षे
तावच्छेदकत्वेविबाधतादवस्थ्यादितिवाच्यं।अग्संतानसंयोगानुविद्धेद्रव्यत्वाधिकरणत्वस्यैवपक्षतावच्छेदक
त्वात्।अवच्छेदकावच्छेदेनसाध्यसिद्धेरदृष्टस्यतेनचपक्षतावच्छेदकहत्वभेदमयुक्तस्यसामानाधिकरण्येनसिद्ध
साधनस्यादोषत्वात्।असतिमतिबंधकइति।अलमध्यस्यबाधमानघटादौव्यभिचारवारणायासतिमतिबंधे

कइति।अग्निसंयोगनाश्यद्रव्यत्वंतिद्यादौव्यभिचारवारणायसंयोगइयंतं।नाद्दष्टद्रव्यत्वस्यसमाधिकरणाग्निसं
योगासमानकालीनत्वान्नव्यभिचारः।अनुद्बुध्यमानद्रव्यत्वादित्यस्यानुद्बुध्यमानद्रव्यत्वाधिकरणत्वादित्यर्थोनिर्द
ष्टोद्बुध्यमानद्रव्यत्वानधिकरणत्वादिति।गगनादौव्यभिचारात्पूर्वंपक्षिणाशंकितासमयोजकतांनिरस्यति।नचेति।
अग्निसंयोगनाश्यत्वादिति।एतच्चोपलक्षणं।भूम्नेरपस्यमधर्मेहिरण्यमित्याद्यागमान्यथानुपपत्तेरप्यनुकूल
तर्कसत्वादिति।एतेनाग्रयनाद्यजन्यद्रव्यत्वनाश्येष्वग्निसंयोगेनव्यभिचारवारणायद्रव्येत्याग्रयणाद्यद्रव्यत्वाधारजातिद्वयो
र्बंधकत्वेत्यधिजातीयद्रव्यनाशप्रत्यग्निसंयोगत्वेनहेतुतास्वीकार्या।तत्रचैजातीयंसुवर्णद्रव्यत्वाद्दष्टमपीति
दृष्टिसानुकूलतर्केसंगतःसुवर्णस्यपृथिवीत्वेपितद्द्रव्यत्वस्याग्निसंयोगनाश्यतावच्छेदकानाक्रांततयाअ
ग्न्यसंयोगमात्रेविनाशादर्शनेरसंभवादित्यपास्तं।क्षोदः।चूर्णं।तस्य।पतिमगुरुत्वाश्रयस्य।प्रकारांतरेण
सुवर्णस्यतेजससंसाध्यतांमतमुपन्यस्यति।अपरेत्यादिना।तत्रतिबंधकंरूपवत्वाधिसिद्धिबंधकं।अग्नि
संयोगस्यतेजससुवर्णविसजातीयद्रव्यंपीतिमेति।साध्येविजातीयपदमुद्दिश्यसिध्यर्थंहेतौसत्यंतमग्निसंयोग
रहितेपूर्वरूपविजातीयरूपवानाधारेघटेव्यभिचारवारणायअत्रहेतौपृथिवीत्वंदेयं।तेनजलपरमाणोर्नव्य
भिचारः।यथाकथंचिदग्निसमुक्तेघटेतद्वारणायात्यंतेति।अत्रोपयोजकत्वं।क्रियाविशिष्टद्रव्यसंबंधविनापार्थि
वाग्निसंयोगस्यपूर्वरूपविजातीयरूपजनकत्वादितिभावः।नचद्रवद्रव्यादन्यदेवमतिबंधकमाद्यं।अदृष्ट
स्यनापत्तेरिति।तस्मेचेति।तस्यद्रवद्रव्यस्यपृथिवीजलभिन्नस्यति।पृथिव्याःपक्षीहरतपीतिमाम्रयविजाती

यत्नाभावाज्जलस्यचलत्वासंभवादित्याशयः तेजस्त्वनियमादिति। वाय्वादेरूपाभावादित्याशयः। नचैवं रूपाश्रयद्रव्यग्रहापत्तिः सुवर्णरूपात्मोकसंयोगसत्त्वादिति वाच्यं। उद्भूतानभिभूतरूपात्मोकसंयोगस्यैवद्रव्यमत्यक्षेहेतुत्वात्सुवर्णरूपस्यत्वभिभूतत्वात्। नचतदानीपीतरूपस्याप्यग्रहात्सजातीयग्रहणहेतमग्रहणंनसुवर्णरूपस्येतितेनस्याभिभूतत्वमितिवाच्यं। लघुतयासजातीयसंबंधस्यैवाभिभवपदार्थत्वात्। नचतथाप्यंधकारेसुवर्णसाक्षात्कारापत्तिः तेजोभिन्नद्रव्यमत्यक्षंप्रत्येवात्मोकसंयोगस्यहेतुत्वादिति वाच्यं। सुवर्णभिन्नं यत्तेजस्तद्भिन्नद्रव्यमत्यक्षंप्रत्येवतस्यहेतुत्वादिति। नचैवंनारूढसुवर्णपात्रेघृतमेवपीतंसुवर्णद्रुतमितिसाक्षात्संबंधेनद्रव्यत्वमतीतेर्धर्मित्वायोगात्। द्रुतंद्रुततरमितिमतीतेर्द्रवत्वस्याप्यंतोछेदादर्शनेचपीतरूपसमवायिकारणतावछेदकत्वाद्रूपनाशेतादात्म्येनसुवर्णस्यविशेषाभावेनपीतरूपनाशइतिवदंति॥ इतितेजोग्रंथः॥ ७॥ वायोःप्रमाणंदर्शयितुंमूलेऽपाकजानुष्णाशीतस्पर्शस्पर्शनेनमतइत्यंतं। तत्रापाकजादिपदानांक्रमेणव्याख्यानमाह। अनुष्णाशीतस्पर्शस्येति। उक्तमपाकजमितीति। यद्यपिअपाकजानुष्णाशीतस्पर्शवत्त्वंघटादावस्तिव्याप्तंतथाप्यपाकजानुष्णाशीतस्पर्शवद्द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंघातदर्थोसेयः। एतेनास्पर्शस्यानुष्णाशीतस्यकथमेनेतन्नेनकृतावछेदकमितितथाचविजातीयस्पर्शजनकतावछेदकतयावायुत्वंजातिःसिध्यतीत्यर्थः। इदमुपलक्षणं। तद्वृत्तिरूपस्यवन्हित्वाद्यछिन्नस्यवाग्नेयत्वकारणतावछेदकतयावायुत्वजातिसिद्धिरपिज्ञातव्यं। मूलेस्पर्शादिलिंगकइति। स्पर्शादिलिंगानियस्यसतथा। मुक्तावल्यांघटीतिघटस्त्रिगुणोद्रव्यस्यापतनं। विजातीयस्यस्पर्शनेति। तत्तद्व्यक्तत्वंतुक्रमनुमानादिसूत्रेतनेनान्वितं। अनुष्णेतिप्रकारस्यो यंरूपंद्रव्यासमवेतस्पर्शः क्वचिदाश्रितःस्पर्शत्वात्। एवंपृथिवीस्पर्शवत्। अत्रपृथिव्यादिस्पर्शेसिद्धसाधनवारणायरूपंद्रव्यासमवेतइतिपक्षविशेषणं। एवमसतिरूपंद्रव्यासमवेतइतिपक्षविशेषणेघोयंवर्णादिषुशब्दसंतानःस्पर्शवद्द्रव्यसंयोगजन्यःअविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वात्। दंडाभिहतभेरीशब्दसंतानवत्। एवंव्यावर्तकविघातजन्यत्वेसिद्धसाधनवारणायासतीत्यादिपक्षविशेषणं। विभागजन्यत्वेशब्देव्यभिचारवारणायहेतावविभज्यमानेत्यादि। एवंनभसिव्यणत्वलक्षणवर्णवृत्तिमानादीत्यंतः। स्पर्शवद्द्रव्यसंयोगहेतुत्वात्। अस्मदाद्यनधिष्ठितद्रव्यवृत्तित्वात्। नौकादिवृत्तित्ववत्। जलादिगतत्वणादौसिद्धसाधनवारणायनभसीति। प्रयत्नवदात्मसंयोगहेतुत्वादित्यत्रव्यभिचारवारणायास्मदादीति। एवंरूपंद्रव्याभिघातमत्वेसतित्वणेकर्मस्पर्शवद्द्रव्याभिघातजन्यंविजातीयकर्मत्वात्। नदीपूराहतकाशादिकर्मवदिति। अत्रेवक्षतइति। अत्रेआत्मविशेषगुणोयमरेरित्यर्थः। यमःनेरृर्धर्मिस्तद्युक्तमिति। नैर्ऋतइत्यर्थः। जलमितिशेषः। स्पर्शादिमानिस्तब्धेरहः। उक्तं। बोध्यमित्यर्थः। एतदेवस्पष्टयति। मुक्तावल्यांवायुर्दृष्टिविधइति। तत्रसंक्षुभ्धे।

अयोनिजं। अयोनिजमेवेत्यर्थः। विज्ञानादीनामिति। मरुतांलोकेप्रसिद्धमितिशेषः। ननुधात्वोस्त्यादिधात्व्या
पाराभावात्करणाद्यभावेन चाहरणादिहरणाद्यभावात्कथंभोगायतनत्वमित्यत आह। परंत्विति। जलीयतेजस
शरीरयोरप्यक्षेपस्यतुल्यत्वात्तत्रकरणाद्यवश्यमभिमत्यसाधारण्येनसमाधानमाह। जलीयतेजसयोरपि
येति। ननुकथंतर्हिजलीयत्वादिधर्मपदेनोच्यतआह। जेत्यादीनामिति। अत्रत्वग्रहिरिति। बोधिशेषः अधिष्ठाना
दिः। शरीरस्यापकर्षमिति। नचनेत्रलोमकेशानांत्वगिंद्रियाधारत्वंसंभवतीतिवाच्यं। तेषांसंमोहिष्यत्वेन
शरीरत्वाभावात्। मूलस्थस्यत्वगिंद्रियमित्यस्यत्वचिस्थितमिंद्रियमित्यर्थः। एतेनदेहआदरणंत्वग्ग्रह्यते। सह६
तश्चपार्थिवंमत्यसंसिद्धेति। नेंद्रियेनचश्रयीमभितिपरास्तं। त्वगिंद्रियेस्पर्शलक्षणमाह। स्पर्शेति। कार्यमात्र
जनकाकारादवतिव्याप्तिवारणायेंद्रियमिति। चक्षुरादावतिव्याप्तिवारणायस्पर्शग्राहकमिति। त्वक्। त्वगिंद्रि
यमित्यर्थः। नन्वेति। त्वगिंद्रियचेत्यर्थः। पक्षेस्पर्शत्वमित्यजनकत्वादसिद्धिवारणायरूपादिशून्यत्वेतीति। म
नसिव्यभिचारवारणायैवकारः। त्वक्त्वन्निष्कर्षमभिव्यापकवारणायद्रव्यत्वेसतीत्यधिकं बोध्यं। अगसंगिसंसि ४७
ष्वेदः। आकरेपञ्चस्तपादभाष्यादौ। प्राणस्त्वेकएवेति। कथंतर्हिपानादिव्यवहारइत्यत आह। स्थान
भेदादिति। हृदिप्राणोगुदेपानःसमानोनाभिसंस्थितः। उदानःकंठदेशस्थोव्यानःसर्वशरीरगइतिस्थानभे ४७
दादित्यर्थः। क्रियाभेदाश्चेति। मुखनासिकाभ्यांयःक्रमणप्रवेशनात्प्राणः। मलादीनामधोनयनादपानः।
आहारस्यपाकार्थंयत्रेःसम्यग्नयनात्समानः। ऊर्ध्वंनयनादुदानः। नाडीमुखेषुदेहेनाड्यानयतीतिक्रिया

भेदाअपंचसंख्यातृप्तेः। ननुसंज्ञाभेदेनसंज्ञिभेदइत्यर्थः॥ इतिवायुग्रंथः॥७॥ आकाशेति। कालत्वंदिक्त्वंनजातिरि
त्यग्रेयक्ष्यते। घ्राणेति। घ्राणत्वेनाजेयंसंगाद्युगपदधिष्ठितं। नजातिरिति। अनेकसमवेतत्वाभावादिति शेषः। तेनैकत्वक्षित्वस्यजा
तेरभावेहेतुत्वेव्यधिकरण्यमितिमत्कृतं। क्षितिरिति। आश्रयतावात्रसमवायेनविवक्षिता। तेनकालस्यजगदाधार
त्वेनशक्त्याश्रयत्वेचनक्षतिः। मोलवेशेषिकपदव्यर्थ्यमाशंक्याह। वैशेषिकइति। इत्थंचशब्दोमूलसाधार इति ४
णंज्ञेयं। एतेन। विशेषगुणत्वकथनेन। प्रमाणमित्यादिशब्दइत्यादिः। संज्ञशब्दःपृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्या
श्रितःअदृष्टद्रव्यानाश्रितत्वेसतिद्रव्याश्रितत्वादित्येवंरूपंबोध्यं। दर्शितं। सूचितं। अत्रानुमानेस्वरूपासिद्धिंपरि
हर्तुमाह। तथाहीति। घटादौव्यभिचारवारणायचक्षुर्ग्रहणायोग्यइति। आत्मनिव्यभिचारवारणायबहिरिंद्रियग्रा
ह्येति। रसत्वादौव्यभिचारनिरासायजातिमदिति। एतत्रानुमानमग्रिमद्रव्यसमवेतत्वसाध्यकानुमानस्वरूपा
सिद्धिनिरासायेतिबोध्यं। गुणत्वादिति। एतदनुमानेनोक्तपरिशेषानुमानेहेतावविशेष्यासिद्धिर्निरस्ता। विशेषणा
सिध्युद्धारायाह। शब्देनस्पर्शवद्विशेषगुणइति। नस्पर्शवत्तोद्रव्यस्यपृथिव्यादिचतुष्टयस्यविशेषगुणइत्यर्थः।
अस्पर्शगुणपूर्वकमत्यक्षत्वादिति। अस्पर्शगुणपूर्वकत्वेसतिप्रत्यक्षत्वादित्यर्थः। हेनुसत्यंप्रतिपादयतु
पाकजेति। नन्वपरमाण्वित्यादि। अग्न्यादीनांपार्थिवरूपादीनांकेषांचिदग्निसंयोगासमवायिकारणत्वात्केषां
चिदसमवायिकारणगुणपूर्वकत्वादत्रोपेक्षा। नदिकालेति। शब्दइत्यनुषज्यते। बहिरिंद्रियेति। मनसोव्यावृत्तिं
हिरिंद्रियातस्यप्रत्यक्षत्वादित्यर्थः। एतेनात्मगुणग्राहकेंद्रियत्वव्यावृत्तेरिंद्रियत्वं। नचमनस्यपिप्रसक्तं। तेभ्यपि

रूपादिग्रहणादिति निरस्तं। इत्थं चानेनप्रकारेणदृष्टिधाद्यदृष्टानामिन्द्रियाणामसिद्धेश्च। सिध्यतीति पूर्वोक्तदृष्टि-
धानुमानेनसिध्यतीत्यर्थः। नन्वेवं सत्यंतदोषदुष्टतयादिशब्दस्यविशेषगुणत्वेकिंचित्प्रमाणंस्यात्। तत्रैवप्रमाणंन
पश्यामइतिचेन्न। शब्देविशेषगुणःलौकिकप्रत्यासत्तेर्हिग्रहणात्वेसतिलौकिकप्रत्यासत्यार्हद्रियग्रहणयो
ग्यतारहित्वेसतिगुणत्वाद्घ्राणजातिमत्त्वादित्यनुमानस्यैवतत्रप्रमाणत्वात्। प्रभात्यमादायव्यभिचारवारणा
यगुणत्वाद्यापयति। गुरुत्वंतेमादायव्यभिचारवारणायप्रथमंसत्यंतं। संख्यात्वमादायव्यभिचारवारणायद्विती
यंसत्यंतं। सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासुप्रहरणहेतोरभावेपितद्ग्रहेतंतरेणैवदृष्टिशेषगुणत्वंसाधनी
यमितिं। पूर्वोक्तानुमानेबाधंस्वरूपासिद्धिंचाशंक्यते। नचेति। यावादिति। तथाचेत्यर्थद्वायुगुणत्वंसंयतत्रस
णात्तदभावंसाधनेबाधइतिभावः। कारणगुणपूर्वकत्वकथनंतुअकारणगुणपूर्वकत्वंघटितहेतोरसिद्धिमद्
र्शनार्थं। अयावद्द्रव्यभावित्वेनेति। स्वाश्रयनाशजन्यनाशप्रतियोगित्वंद्रव्यत्वेनेत्यर्थः। ननुतथाप्योका
शेप्रत्यक्षत्वेयमबाधकिमितिनोपन्यस्तमितिचेन्न। चाक्षुषत्वेमयोजकस्यमहत्त्वेसतिउद्भूतरूपवत्त्वस्याका
शेऽसंभवेनचक्षुषःप्रमाजनकत्वासंभवात्। ननुयद्याकाशेनचाक्षुषत्वंतर्हिचाक्षुषोऽधिकरण्यं
नकिंभासतइतिचेदालोकएवेतिकल्पय। अन्याकाशीयशरीरविषययोःप्रदर्शनमुद्दिश्यैवकथमिंद्रियं
दूरनिमिंद्रियंसुभटेक्रोशमित्यनेनग्रंथेनक्रियतइत्याशंक्याह। तत्रचेति। आकाशेत्यर्थः। कर्णशष्कुलीभेदादिति।

चेत्यादिकर्णशष्कुल्यवच्छिन्नमाकाशंचेत्रादिश्रोत्रमितिभावः। नचास्त्वाद्यदृष्टिनिमित्तकारणत्वेनकुसस्येश्वरस्येयत्ता
ऽसमवायिकारणत्वं। नचेश्वरस्यशब्दसमवायित्वंजीवस्यवादृष्टस्यत्रविनिगमनाविरहः। जीवस्यशब्दसमवायित्वे
ऽनवच्छेदस्यापिमानसापत्तेः अदृष्टवत्प्रतिबंधकल्पकत्वेगौरवं। नचैवंकर्णशष्कुल्यविरहावच्छिन्ना
काशस्यकथंश्रोत्रोपपत्तिरितिवाच्यं। तथाविधस्येश्वरस्येवश्रोत्रोपपत्तिरित्याहुः। स्यैतत्रात्मद्रंगादि
नामेवगुणःशब्दःशब्दंप्रतिमद्रंगत्वादिनासमवायिकारणतायाःस्त्रीकारात्। मात्रीनेरपिमद्रंगत्वादिनानि
मित्तकारणतायाःस्त्रीकारात्। मद्रंगंशब्दइतिप्रतीतेश्च। नचतत्रावच्छेदकसंबंधयोमानाभावात्। अन्यथा
ऽवच्छेदकतारूप्यसंबंधस्यान्यत्रसमवायस्यकल्पनेगौरवादितिवदंति। इत्याकाशग्रंथः॥ ७॥ मूलेज
न्यानंजनकइति। कार्यतावच्छिन्नंप्रतिनिमित्तकारणमित्यर्थः। अत्रचक्षुरालिकसंबंधावच्छिन्नकार्यतावच्छि
न्नकार्यतानिरूपितमधिकरणतायानिमित्तत्वंकार्यलक्षणे। कालिकसंबंधावच्छिन्नेतिकरणादृष्टेश्वरयो
रतिव्याप्तिरितिध्येयं। ननुकार्यमात्रंप्रतिकालस्यनिमित्तकारणत्वेकिंमानमितिचेदाहुः। अद्यघटोभविष्यतिश्वःपटोभविष्यतीत्यादिप्रयोगोऽन्यथासिद्धोऽधिकरणत्वेनाऽनुगमा
भावात्। क्रियतेतदुसंसिद्धिकरणत्वेनव्यवहारविषयस्यचतदुसंसिद्धिहेतुत्वनियमात्। तदुसंसिद्धिहेतुत्वस्य
तद्धेतुत्वव्याप्यत्वात्। एवंचतत्तत्कार्यंप्रतितत्तत्कालोऽधिकरणंस्वहेतुत्वेसिद्धेयदृष्टेश्वरयोरि
तिव्याप्तिःकार्यमात्रेकालस्यहेतुतासिद्धेरिति। साचहेतुतानिमित्तकारणत्वेन। नचकालस्यकार्यमा

असमवायिकारणसंयोगविभागपरत्वापरत्वप्रतिकालस्यसमवायिकारणत्वेनतद्विशेषत्वघटितस्यनिमित्तकारणत्वस्यौपाधिकत्वादित्याचार्यैरुक्तंज्ञेयं। संयोगस्यसंबंधेनद्रव्यादिकंसमवायिकारणत्वेपिकालिकंसंबंधेनद्रव्यादिकंप्रतिनिमित्तकारणत्वस्यानपायादेवमेवकार्यमात्रेदिशोपिनिमित्तकारणत्वंबोध्यमुक्तायत्नोतन्नेति। तत्र। कालेजगतामाश्रयइतीति। कालःसर्वघटनिष्ठप्रतीत्यासमवायिकारणत्वेनैकात्मसिद्धिरितिभावः। ननुतर्हिक्रमतीतिर्दिग्विषयिण्येवास्तुअतिरिक्तकालैक्यनेगौरवादतोनैकेश्वरमनोमतीत्याकालःसाध्यतेपरंतुअन्यानपेक्षत्वादेवपरतमतीतिवत्कालार्थधारत्वंकल्प्यतइत्यतआह। इदानीमित्यादिना। सूर्यपरिस्पंदादिकमितिइदानीतदानीमितिमतीतिमद्विषयीकरोतीतिशेषःनचैवंसतिइदानीघटोनतदानीमितिप्रयोगानुपपत्तेःनचतत्तत्क्रियाविशिष्टोमहाकालएवइदानीमितिप्रत्ययविषयइतिवाच्यं। तथासतिइदानीघटोनतदानीमित्यस्यतत्क्रियाविशिष्टमहाकालेघटोनतत्क्रियाविशिष्टेमहाकालइत्यर्थइतिवाच्यं। नथासतितत्तत्क्रियाविशिष्टमहाकालापेक्षयात्तद्घटेनतत्तत्क्रियायाएवतादृशमतीतिविषयत्वस्योचितत्वादितिचेत्तुल्यंनंतरं स्याग्रयतपनसंयोगिसंयोगएवसंबंधोवाअस्त्वितिशेषः। ननुआकाशएवसंबंधघटकआस्तामितिवाच्यं। आकाशादिगात्मनोविनिगमनाविरहेणातिरिक्तकालस्यैवतथात्वात्। इत्थंचेति। अतिरिक्तकाल

सिद्धेरित्यर्थः। सम्यगिति। कालःसर्वमितिप्रतीतेरतिरिक्तकालविषयकत्वस्यैवोचित्यादितिभावः। परत्वापरत्वबुद्धेरिति। ज्येष्ठेपरत्वमल्पेचापरत्वमित्यनुभवसिद्धयोःपरत्वापरत्वगुणयोरित्यर्थः। परत्वापरत्वेचासमवायिकारणके। भावेकार्यत्वात्। असमवायिकारणत्वंचतयोःकालविशेषसंयोगएवेति। परत्वापरत्वयोरसमवायिकारणसंयोगस्यायतयाकालसिद्धिरितिभावः। परत्वापरत्वयोरित्यस्यैवदर्शनमुचितत्वेपि दूरदृष्टिपर्यंतानुभवनंकालिकपरत्वापरत्वयोःप्रमाणंदर्शयितुं। ननुविशेषगतरूपादेरपरत्वापरत्वासमवायिकारणत्वमस्त्वितिवाच्यं। कालिकपरत्वापरत्वयोर्वाधबाधसाधारणत्वादाह। अतएवदृष्टेति। विशेषसंयोगस्यनतत्रकारणत्वंदृष्टिविषयसंयुक्तपदार्थेविनाहृदापरत्वापरत्वयोरसादेनव्यभिचाराद्। ननुतथाप्याकाशादिगात्ममनोभिःविशेषसंयोगस्यतथात्वंस्यात्किंकालेनकल्प्यनेयेमतआह। नाघ्रादिति। आकाशादिष्वपिविशेषसंयोगस्यतथात्वेजीवात्मभिःमनसिकदिनिगमनादिरहादात्ममनसोस्वनंतत्वान्नतथात्वंकिंतुनाघ्रादतिरिक्तःकालएवतथात्वेनकल्प्यतइतिभावः। ननुकालएकएवतदाश्रयानपेक्षादिनाव्यवहारस्तत्रनस्यात्। नचैकस्मिन्नेवघटेघटःकलशःकुंभइतिव्यवहारवदाकाशादिष्वपिव्यवहारेबाधकाभावइतिवाच्यं। एकस्मिन्विशेषेनानाव्यवहारायोगाद्घटत्वकलशत्वादिकंमिथोविशेषणत्व दिनत्वादिकंतुविशेषेनहिदंरूपादिरितिप्रतीतिरस्तीतिशंकते। नन्वेकस्येति। समयभेदः। सम

४३

यभेदव्यवहारः। भिन्नव्यवहारविषयत्वमिति यावत्। एकस्मिन्नित्यत्वज्ञानाव्यवहारविषयत्वाभावादिति भावः।
उपाधिभेदादिति। तथाचैकस्यैव कालस्यकिंचिद्धर्मविशिष्टस्यक्षणत्वंकिंचिद्धर्मविशिष्टस्यदिनत्वंनतुकेवल
कालस्येतिभावः। इदमुपलक्षणं। तादृशोपाधीनामेवक्षणत्वादिव्यवहारविषयत्वंनतुमहाकालस्येत्यपिदृष्ट
व्यं। स्वजन्येति। स्व। क्रिया। घटगतैकक्रियानाशोत्तरोत्पन्नतदेकक्रियांतरजन्यविभागप्रागभावविशिष्टस्य
प्रथमकर्मणः क्षण चतुष्टयावस्थायिनः क्षणत्वापत्तिरतः स्वजन्येति। नन्वेवंप्रथमक्षणक्षणव्यवहारो
पपादनेविद्वितीयक्षणेकथंतदुपपादनं। तत्रक्रियाजन्यविभागोयस्याविभागप्रागभावाभावात्। नचद्वि
तीयक्षणेऽपरक्रियांतरस्यैवनिरुक्तविशिष्टस्यतत्रक्षणत्वमितिवाच्यं। प्रतिक्षणंक्रियोत्पत्तौमानाभा
वात्तत्तत्रापिक्षणव्यवहारोपपादकमुपाधिमाह। पूर्वसंयोगेति। स्वजन्यविभागनाश्यपूर्वसंयोगविशि
ष्टः स्वजन्यविभागइत्यर्थः। तेनस्वजन्यविभागस्ययत्किंचित्पूर्वसंयोगविशिष्टस्यद्वित्रिक्षणव्यवहारो
यत्किंचिद्विभागस्यस्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्यतथात्वेपिचक्षुर्नेति। तृतीयक्षणेतदु
पपादकमुपाधिमाह। पूर्वसंयोगनाशावच्छिन्नउत्तरसंयोगप्रागभावेति। स्वजन्यविभागजन्यपूर्व
संयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभावइत्यर्थान्नातिप्रसंगः। क्वचित्पुस्तकेपूर्वसंयोगना
शावच्छिन्नविभागोयमिति पाठः सचयामादिकः। प्रथमद्वितीयचतुर्थक्षणेषुएकैकोपाधेरभावेहितत्र
यात्तृतीयक्षणेऽपाधिद्वयसमवधानेसंदर्भविरोधापत्तेः। उत्तरसंयोगस्यैवविभागनाशकतायाः सिद्धांत

सिद्धतयानिरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वौचित्यात्। यदिचतत्राद्यमाप्येव्याग्रहस्तदापूर्वसं
योगनाश्यैवविभागनाशकत्वमिष्टमित्येषोऽनयोः। चतुर्थक्षणेतमाह। उत्तरसंयोगेति। स्वनाश्योत्तरसंयो
गेत्यर्थः। तेनसर्वस्यैवसंयोगस्योत्तरसंयोगतयातद्विशिष्टधर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्ति
रित्यलं। नन्वेतादृशक्षणक्षणंमहाप्रलयात्मकक्षणेऽव्याप्तं। तत्रतादृशकर्मनाशाभावात्। नचमहाप्र
लयस्यक्षणाभावइष्ट एवेतिवाच्यं। तत्रापिक्षणत्वव्यवहारसत्वात्। अन्यथामहाप्रलयोत्तरोत्पन्नउत्प
त्तिःक्षणास्यतदधिकरणक्षणावच्छित्तिर्यापरस्यध्वंसप्रतियोगितावच्छेदकसमयवृत्तित्वरूपस्याव्या
प्त्यापत्तेः। तत्रमहाप्रलयाधिकरणक्षणाप्रसिद्धेरतआह। महाप्रलयेति। महाप्रलयक्षणव्यवहारो
नास्त्येव। उत्पत्तिःक्षणास्यक्षणाघटितस्यैवस्वध्वंसप्रतियोगिकालवृत्तित्वविशिष्टस्वध्वंसत्व
रूपस्यतदुत्पत्तौसंभवादित्यभिप्रेत्योक्तंयदीति। ध्वंसेनेतिं। स्वध्वंसप्रतियोगिप्रतियोगिकयो
र्ध्वंसविशिष्टसमयस्यैवतत्रक्षणव्यवहारविषयत्वादितिभावः॥ इतिकालग्रंथः॥ छ॥ बीजेप्रयो
जकं। कथंदिगादिरत्रप्रयोजकंतद्दर्शयति। दिशिकपरत्वापरत्वयोरिति। तत्रापरत्वापरत्वयुद्धिं
प्रतिपरत्वापरत्वंनिमित्तं। तत्रदिक्संयोगस्तत्रादिशब्देन। क्रमेणपरंपरयादिशस्तद्बुद्धेर्निमित्तं
एंवोध्यं। अत्रादिबुद्धिपर्यंतानुधावनंदेशिकपरत्वापरत्वयोः प्रमाणंदर्शयितुं। नतुदूरपरत्वापर
त्वाभ्यामेवतदनुमानेः संभवादिति। प्रतीत्यादीत्यादिनाउदूरत्वादिसंग्रहः। उपाधीति। यस्तत्तद्दिग्

ती०१

एकत्वेनैवोपाधिभेदेनेत्यादिसंज्ञाभेदइतिभावः। प्रागादिसंज्ञासुनिमित्तभूतानुपाधीनाह। यस्मुरुषस्येति। पुरुषस्येतिपदार्थमात्रोपलक्षणं। पंचम्यर्थेषष्ठी। दिक्। मूर्त्ती। एवमग्रेपि। तथाचयदपेक्षयोदयगिरिसंनिहितंयन्मूर्त्तंसाततः प्राचीत्यर्थः। तदपेक्षयोदयगिरिसंनिहितत्वंचतन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षमा। मेतरोदयगिरिसंयुक्तसंयोगवत्तं। दृश्यंचमथुरातः प्राच्यांप्रयागइत्यत्रमथुरानिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्याप्यसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तत्वं। प्रयागइत्यन्वयबोधः। एवंकाशीतः प्राच्यांप्रयागइत्यत्रकाशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्याप्यपर्याप्तसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तत्वं। प्रयागइत्यन्वयबोधः। एवमन्यत्रापि बोध्यं। तन्निष्ठोदयाद्यवच्छेदकसंयुक्तसंयोगपरंपराघटकमूर्त्तत्वं प्राचीत्यादिपदानि। दिग्धितिरत्र ८५ रूढा। दिक्शब्दोनेश्वरादितिरित्यते। मानाभावात्। नसत्कालोपाधिर्दिगुपाधिर्विशिष्टादीश्वरादेरक्षणादि नप्राचीत्यादिव्यवहारोपपत्तेरित्याहुः। तत्रनव्याः। ईश्वरस्यादिक्षणरूपत्वंतन्नज्ञोयस्येतिविग्रहनाश्रितहेत्वाश्रितहेत्वोस्तयोः स्वीकारः। नचतन्नज्ञोयस्यजगज्जनकत्वंपरत्वापरत्वजनकत्वंच कल्प्यमीश्वरस्यतु कूटस्थनित्यज्ञानाधिकरणत्वमितिवाच्यं। संबंधघटकतयोर्दिक्कालयोर्जगज्जनकत्वाकल्पनाद्दिक्कालोपाधीनांभेदजगज्जनकत्वकल्पनात्। परत्वापरत्वयोरुक्तगुणत्वएवमानाभावः। सन्नि

दष्टएवेमरदृष्टाभ्यामेवपरापरव्यवहारौपपत्तेरितिवदंति॥ मूर्त्तिरिक्तेषणं॥ ७॥ सुखदुःखादीति। आदिनाज्ञानेच्छाद्वेषहरितथर्मधर्मभावनापरिग्रहः। यद्यप्यात्मस्वात्मन्यपिस्वक्षत्वेपिस्वात्मनिस्वरूपतोमानसप्रत्यक्षविषयत्वमस्येवतथापिसकलात्मधारणानुगतप्रत्यक्षसंभवेनजातिरूपंतन्नसिध्यति। अनेकसमवेतत्वघटितजातित्वग्रहेअनेकव्यक्तिग्रहहेतुत्वस्यसर्वसिद्धत्वादेवानुमानमेवतत्रप्रमाणमित्यस्मिन्मायेणसुखादिकारणतावच्छेदकतयातत्सिद्धेःप्रदर्शिता। अथसुखत्वाद्यधिकरणंप्रतिआत्मत्वेनकारणत्वेमानाभावः। सुखदुःखद्वेषभावनाधर्माधर्मप्रतियथाक्रमंधर्मधर्मनिष्ठसाधनत्वादिज्ञानानुभवधिहतनिबिडदुरदृष्टकर्मणांसमवायसंबंधेननिमित्तकारणत्वस्यावश्यकतयातिप्रसंगभंगात्। भावकार्याणांसमवायिकारणकत्वनियमस्यतुद्रव्यत्वेनतन्नव्याप्तिःसमवेतप्रतितन्नव्याप्तित्वेनासमवायिकारणत्वमादायेवोपपन्नत्वादितिचेदत्रोच्यः। कार्यमात्रंयन्निजातेःसमवायिकारणकार्यतावच्छेदकत्वनियमेनतादृशकार्यकारणभावस्यावश्यकत्वात्। नचतावतासुखत्वाद्यधिकरणंप्रतिसत्वेनद्रव्यत्वेनकारणत्वमस्त्वदृष्टादेर्निमित्तकारणत्वादतिप्रसंगनिरहादितिवाच्यं। आद्यक्षणध्वंसेतत्कारणतावच्छेदकेसंभवतिव्यापकधर्मेणकारणत्वंकल्प्यमितिनियमादाद्यशब्दोक्तक्षणध्वंसादिसाधुः। यस्मात्तस्मात्। मनसिसाक्षात्संनिधारणायज्ञानत्वावच्छिन्नंप्रत्यात्मत्वेनहेतुत्वमावश्यकमिति। ननुतथाप्यात्मत्वजातेर्भगवदात्मसाधारण्येमानाभावइत्यतआह। ईश्वरइति। आत्मावारेद्रष्टव्यइत्यादिश्रुताथा

स्वपदमर्थहारादिति भावः। ननु तर्ह्यीश्वरेसुखाद्युत्पत्तिः कुतो न भवतीत्यत आह। अदृष्टादिति। आदिना शरीरपरिग्रहः। ननु नित्यस्यस्वरूपयोग्यत्वेफलं किं भवतीति नियमेनेश्वरस्यस्वरूपयोग्यत्वे फलोपधानापत्तिरत आह। नित्यस्येति। नन्वीश्वरेऽदृष्टकृतो नोत्पद्यत इत्येव। मिथ्याज्ञानरूपकारणाभावात्। मिथ्याज्ञानस्याहेतुत्वेचमुक्तात्मन्यदृष्टोत्पत्तिप्रसंगः। यदस्यात्मपदस्यज्ञानादिमत्तिलक्षणापत्तिरित्यस्वरसआहुरित्यनेनसूचितः। इंद्रियाद्यधिष्ठातेतिमूलमात्मप्रमाणपरतयाव्याचष्टे। इंद्रियाणामिति। आदिपदसंग्रह्यमाह। शरीरस्येति। परंपरया। जनकतासंबंधेनायछेदकतासंबंधेनच। चैतन्यं। ज्ञानयत्नं। एतेनात्मनित्यमानमुपदर्शितं। अचेतनंचेतनाधिष्ठितंतथाभासेः। अहंसुखी। इत्यादिनाऽहंज्ञानानिकरोमीत्यादिपरिग्रहः। नचात्माताभ्यन्नमत्यक्षइतिसूत्रभाष्यविरोधइतिवाच्यं। आत्मतत्त्वविवेकेपरमात्माभिप्रायेणाभाष्यव्याख्यानस्यप्रदर्शितत्वात्। विमतिपन्नंमतीति। अहमितिप्रतीतेः शरीराद्यतिरिक्तविषयत्वेधिमतिपन्नंमतीत्यर्थः। नैय्यायिकमतेयथामुक्तानांज्ञानाभावेननज्ञानाधिकरणत्वरूपंचैतन्यंतथाममापिमतेमृतशरीरस्यनचैतन्यमितिशरीरमेवात्मेति[illegible]वादीवाधिकः शंकते। चैतन्यमिति। ज्ञानादिकं। ज्ञानाद्यधिकरणत्वं। तदभावे। ज्ञानाभावे। ननुत्वन्मतेमृतशरीरेचैतन्याभावः किंनिबंधनः मन्मतेतुप्राणविशिष्टस्यात्मनोधिरहएवतत्रहेतुरित्यत आह। प्राणाभावेनेति। तथाचाद्यवात्प्राणाभावएवचैतन्याधिरहेम

करोतीति७

४६

४६

येऽजडइतिभावः। चार्थिकमसंचारहरति। नेति। स्मरणानुपपत्तेरिति। अनुभवाश्रयस्यात्मशरीरस्यतदानीमभावादितिभावः। ननुचात्मशरीरसंबंधस्यनित्यत्वेतत आह। शरीराणामिति। संस्कारउद्बुद्धइति। तथाचस्मृतिभोज्यसंस्कारसंबंधेनचात्मशरीरसमवेतानुभवस्यस्थिरशरीरेसत्यन्यस्मरणानुपपत्तिरितिभावः। भोगस्यफलमुखत्वाद्दुःखांतरमाह। एवमिति। नन्वादिसूत्रहेतुमाह। दुष्टेति। तद्धेतुत्वात्। प्रवृत्तिहेतुत्वात्। तदर्थं। स्तनपानप्रवृत्त्यर्थं। तदभावे। ज्ञानाभावे। ननुत्वन्मतेमृतशरीरेचैतन्याभावः किंनिबंधनः मन्मतेतुप्राणविशिष्टस्यात्मनोधिरहएवतत्रहेतुरित्यत आह। प्राणाभावेनेति। तथाचाद्यवात्प्राणाभावएवचैतन्याधिरहेम

त्वेसति९

स्तनपानप्रवृत्त्यर्थं। तदभावे। ज्ञानाभावे। ननुत्वन्मतेमृतशरीरेचैतन्याभावः किंनिबंधनः मन्मतेतुप्राणविशिष्टस्यात्मनोधिरहएवतत्रहेतुरित्यत आह। प्राणाभावेनेति। तथाचाद्यवात्प्राणाभावएवचैतन्याधिरहेम

वकर्तृत्वेकरणत्वेकर्तृकरणत्वादिव्यवहारभेदोनुपपन्नइत्यतोविरोधइति।विरोधे।द्विष्ठभाधिकरणत्वेति।तथाच
कर्तृत्वकरणत्वादिलक्षणोपाधिभेदात्कर्तृकरणादिव्यवहारभेदोपपत्तिरित्याशयः।नचैतन्यमित्यत्रविशेष्यत
योपस्थितस्याभावस्यतच्छब्देनपरामर्शसंभवतीतिवाच्यंतेतन्यमितिनुपघातपदस्यलोके।यथवनाश
एवप्रयोगादाह।नाशइति।मूलेऽनुपघातेकथंस्मृतिरित्यत्रतेनोपघातःकेषामित्याकांक्षायाःसत्त्वादाह।अर्थो
दिति।तथाचैकमेवेंद्रियाणामितिपदमाकांक्षावशादुभयत्रसंबध्यतइत्याशयः।कथंस्मृतिरितिमूलेनेंद्रिया
णांचैतन्यपक्षेस्मृत्यभावआपादितस्तत्रहेतोरनुक्तेःस्वयंहेतुंपूरयन्नर्थमाह।पूर्वंचक्षुषेति।नन्विंद्रियांत
रेणेवस्मृतिर्भविष्यतीत्यतआह।अन्येनानुभूतस्येति।तत्रहेतुमाह।अनुभवेति।यद्यपिह्यधिकरणयोःकार्य
कारणभावधिरहासामानाधिकरण्येनस्मृतिर्विषयतासंबंधेनतथाविषयतासंबंधेनस्मृतिस्तत्रविषयतास
बंधेनानुभवइतिईदृशविषयघटितसामानाधिकरण्यमस्त्यासत्त्यात्कार्यकारणभावआवश्यकः।अन्यनिष्ठ
सामानाधिकरण्यघटितकार्यकारणभावेनघटाद्यनुभवोनरेपटादिविषयतासंबंधेनस्मृत्यापत्तेरितिचक्षुः
कर्तृकानुभवस्यघटेसत्यादिंद्रियांतरकर्तृकस्मरणंतत्रानुपपन्नमित्याशंक्यनिराकरणा
यतथोक्तिः।समवायघटितसामानाधिकरण्येप्रत्यासत्तेतिनदर्धः।चैत्रस्यघटानुभवकालेमैत्रस्यघटस्म
रणधारणायत्नसुखीयत्नभिन्नेश्वरपुरुषभेदेनानंतंकार्यकारणभावंकल्पयतोगौरवात्समवायघटितसा
मानाधिकरण्यमत्यासत्यातयोर्हेतुहेतुमद्भावस्वीकारादितिभावइतिध्येयं।इंद्रियाणांचैतन्यपक्षे

चादोषःसोऽयमित्यत्रेनासातिसंचयितुंनित्यस्येति।ननुतत्रयत्रमलेतच्छब्देनपूर्वोपस्थितचैतन्यस्यैवपरामर्शः
स्यात्तथाचासंगतिरतआह।नतथाचेतनमिति।अनध्यक्षेतदाभवेदितिमूलेमनसश्चेतन्येज्ञानादेरयत्नस
त्मुत्पत्तत्रहेतुमदर्शनमर्थमाह।मनसइति।तत्प्रत्यक्षेति।ज्ञानादिमत्प्रत्यक्षानुपपत्तेरित्यर्थः।ननुमनसोऽणुत्व
मेवासिद्धमतआह।यथाचेति।अत्रेदंबोध्यतइति।अत्रयोगपद्याद्धिज्ञानानीतस्थाणुत्वमिहच्यवतेइतिग्रंथेनम
नसोऽणुत्वंसाधयिष्यतइत्यर्थः।विज्ञानयौगपद्येशंकतेनन्विति।विज्ञानमेवेति।आत्मनिरूपणस्यप्रस्तुत्वा
दात्मेत्युक्तं।वस्तुतआत्मस्वतन्त्रंनविज्ञानरूपत्वादितिशेषः।अत्रज्ञानत्वंप्रमेयत्वंस्वसत्त्वेस्वयंव्यापकत्वंवेत्तृत्वं
प्रतिपत्तिः।तत्रविधिकोटिर्वेगाचारस्यनिषेधकोटिर्नैर्व्यापकस्येतिध्येयं।द्वितीयंज्ञानं।प्रत्यक्षविज्ञानमा
त्मप्रत्यक्षविज्ञानंचेति।तत्रघटइतिप्रत्यक्षंविज्ञानं।अहंज्ञानमित्यात्मप्रत्यक्षंविज्ञानं।तदेवात्मा।तस्य।विज्ञानस्यज्ञ
नुसुषुप्तावात्मनिसिध्येत्सूर्यस्यनक्तिज्ञानस्यक्षणिकत्वेननाशाद्विज्ञानांतरस्यचतदानीमुत्पादकाभावादत
आह।पूर्वपूर्वेति।ननुक्षणिकेज्ञानस्येक्षणिकत्वेतदाश्रितसंस्कारस्यापिक्षणिकत्वात्कालांतरेस्मरणंनस्यादित्सा
शंक्यंपरिहरति।मृगमदेति।विज्ञानस्यजगद्वैचित्र्यंप्रयोजकंविषयतंत्राभिप्रेतमितिविकल्प्याद्यंदूषणमा
ह।तस्येति।द्वितीयेत्वाह।यत्किंचिदिति।आत्मेरूपविज्ञानस्यसविषयत्वेदूषणमाह।सुषुप्तादिति।शंकते।
तदानामिति।निराकरोतिनिर्विषयिणी।विज्ञप्तितिःविज्ञानसंततिः।प्रकाशतेज्ञानत्वेज्ञानस्यविषयि

तत्राह्यत्यादिभावः। अन्यथा प्रमाणाभावेऽपि तज्ज्ञानत्वस्वीकारे। आकारस्यधिगतावतिरिक्तत्वमनतिरिक्तत्वंवेति
विकल्प्याद्येदूषणमाह। तर्हिसमेति। द्वितीयेत्वाहासमूहालंबनइति। नीलपीतेइतिसमूहालंबनइत्यर्थः। स्या
दिति। तदभिन्नाभिन्नस्यतदभिन्नस्यनियमादितिभावः। भेदेदोषादयति। स्वरूपनीधिज्ञानस्येति। धिज्ञान
स्वरूपस्येत्यर्थः। अधिशेषात्। एकत्वात्। ननुनीलाकारःपीताकारश्चाभिन्नएव। भेदभ्रमोनीलत्व
पीतत्वयोर्भेदात्। नचतयोरधिज्ञानस्वरूपत्वादभेदः। नीलत्वादेरपारमार्थिकस्यपारमार्थिकधिज्ञानेना
भेदासंभवादित्यभिप्रायेणानूद्यदूषयति। अपोहरूपइति। अनीलव्यावृत्तिरूपइत्यर्थः। इतरथा। विरुद्धनीलत्वा
दीनामेकत्रसमावेशे। ननुसमूहालंबनेनभी। त्काराेनथापीताकारोपपद्यतेपरंतुधिआकारएवेतिनोक्तदो
षइतिपूर्वोक्तंथासनासंकर्मंमुख्यतयादूषयति। नचेति। मातृपुत्रयोरिति। माताऽनुभूतस्यगर्भस्थेनतन
येनस्मरणमसंगादितिभावः। उपादानेनानुभूतंउपादेयेनस्मर्यइतिनिरस्यति। नचेति। शंकतेउत्तरस्मिन्निति।
नदुःखादकेति। थासनोत्पादकेत्यर्थः। चिंतामेवेति। ज्ञानानामेवसंस्कारोत्पादकत्वेतेषामानंत्यात्संस्कारानंत्या
पत्तिरित्यर्थः। शंकतेक्षणिकेति। अतिशयविशेषः। मूलविशेषः। उत्तरोत्तरज्ञानानुकूलत्वमितिशेषः। गोरथा
दिति। सएवायमित्याकारमत्यभिज्ञानास्खलितैकानंतमात्रस्थितत्वागभावाध्वंसकल्पनेगोरथादित्यर्थः। ननु
क्षेत्रस्थबीजादंकुरोयत्रिर्नकुसूलस्थबीजादतोंकुरत्वाविशेषान्नप्रतिकुर्यादूषणेनहेतुत्वंमंगीक्रियते। कु

र्यादूषणंशंकुरजनकतावच्छेदकनयास्तिहेजातिविशेषः। सचफलोपधायकक्षणिकसमर्थबीजमात्रवृत्तिबी
जत्वोप्यकल्प्यते। एवमग्रेपिकुर्यादूषणेनेक्षणिकशरीरेषूत्तरोत्तरशरीरनिष्पादनासनोत्पादकत्वंधात्यमत
माह। बीजादयधीति। उपपत्तेः। कस्माच्चिद्बीजादंकुरोत्पत्तिः। कस्माच्चिन्नेतिनियमोपपत्तेः। कुर्यादूषणंक
ल्पनेदिति। कुसूलस्थबीजादिषुधरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरानुत्पत्तेः। कुर्यादूषणं
तादृषेणजनकत्वंचनकल्प्यतेमाणाभावादितिभावः। अत्रवदंति। यैस्तु। स्थिरंकिमितिव्याख्याजगतः क्षणिकता।
तदनुरोधेनचकुर्यादूषणंतदूषणायंमतिहेतुत्वंचायत्यंकानवतादृशव्याप्तौमानाभावः। तादृशव्याप्यस्वीका
रेकुसूलस्थबीजादंकुरोत्पत्तिधारणाधरणिसलिलसंयोगादीनांसहकारित्वकल्पनेगौरवात्। तादृशव्या
प्तिस्वीकारेतुकुर्यादूषणेनहेतुत्वकल्पनाकुसूलस्थबीजेकुर्यादूषणाभावादेवांकुरानुत्पत्तेर्सहकारितावा
रणांतरावश्यंमितिन्यूनत्वात्। नचक्षणिकत्वमतेपिबीजस्यधरणिसलिलसंयोगादेर्थंकुर्यादूषणेनहेतुत्व
मित्यत्रयुक्तिगमनाविरहपर्यवसन्नंबीजसहकारिणांकारणत्वकल्पनमावश्यकमितिवाच्यं। मन्मतेकुरंप्रतिबीज
नांधरणिसलिलसंयोगादिसहकारिणांचकुर्यादूषणेनहेतुत्वकल्पनात्। कुर्यादूषणांगीकारेबीजत्वध
रणिसलिलसंयोगत्वादिमानाहेतुत्वकल्पनेगौरवादिति। तदसत्। ईदृशगौरवापेक्षयास्खलिताऽनंतपदा
र्थकल्पनेतिगौरवात्। नचयत्रार्थेकुर्यादूषणेनतेषामहेतुतासिद्धाईदृशगौरवंनदोषायकल्पमु
खत्वादितिवाच्यं। कल्पमुखगौरवस्यादिदोषत्वात्। किंचजगतः क्षणिकत्वेसएवायंघटइतिप्रत्यभिज्ञानुप

वस्तिः पूर्वकालीनघटाभेदस्येतत्कालीनघटे भावाद्। नचैतज्ज्ञातौ याभेदएवतादृशप्रतीतेर्विषयः तन्मतेजा
तेरविक्षणिकत्वेनपूर्वकालीनघटध्वंसिघटत्वस्येतत्कालीने भावाद्। एतेनजगतः क्षणिकत्वेनाद्याधक्षिन्नम
न्तिमक्षणेनैकमेवहेतुत्वमित्यपिनिरस्तं। यदपिस्थिरपदार्थंगीकारेएकस्मिन्पदार्थे सामर्थ्यमसामर्थ्यं च
विरुद्धमतस्तद्भेद इति। तदपि न। एकस्मिन्नेककालावच्छेदेनसामर्थ्यतदभावयोरेवविरुद्धत्वात्कालभेद
नतत्स्वीकारेबाधकाभावाद्। यदपूर्वपरकालीनधर्मिणोरभेदेतद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदे नुपप
न्नस्तन्मतेधर्मधर्मिणोरभेदादिति। तन्न। घटत्वंनघट इत्यादिप्रतीतीनामप्रामाण्यापत्त्याधर्मधर्मिणोरभे
दस्यवस्तुमत्त्वशक्यत्वादितिदिक्। येदंतानुगंकते। अस्तुतर्हीति। क्षणिकविज्ञानइति। आत्मनः क्षणिकवि
ज्ञानस्वरूपत्वपक्षइत्यर्थः। आत्ममात्रस्यनित्यविज्ञानरूपस्यमीश्वरस्येतिविकल्प्याद्येदूषणमाह। त
स्येत्यादिना। दृश्यंतित्यादिति। तस्यजगद्विषयकत्वेइत्यादिग्रंथेनदृश्यंतित्यादिरत्वर्थः। तथाचजीवस्यतथात्वं
प्रथान्मात्रमात्रस्यनित्यज्ञानरूपत्वमितिभावः। ननुजीवस्यजगद्विषयकत्वंनेष्यतेकिंतुविषयकत्वं
भ्रमः परंतुविषयकत्वंयत्रजीवे। मुभयसिद्धंतत्रतद्विषयकत्वमतआह। सविषयकत्वस्येति। ननुसत्य
ज्ञानमितिश्रुतेरीश्वरजीवस्यज्ञानस्वरूपत्वेप्रमाणमतआह। सत्यमिति। ननुजीवब्रह्मणोरभेदंश्रुतिर्व्याचिख्या
नरूपंजीवस्यनिराबाधमित्यतोजीवब्रह्मणोर्भेदंबाधतइति। ज्ञानाज्ञानेति। सुखित्वादीत्यादिनादुः
खित्वपरिग्रहः। स्वतरामिति। जीवात्मनानानात्वसिद्धावीश्वरस्यैकस्यानेकजीवात्मकत्वंसभवादेकत्वा

नेकत्वेविरोधादितिभावः। ईश्वरभेदः। ईश्वरजीवात्मनोर्भेदःसिध्यतीतिशेषः। अन्यथा। ईश्वरस्यजीवात्म
कत्वेबंधमोक्षेति। कश्चित्संसारीयदुःकश्चिन्मुक्तइतिव्यवस्थानुपपन्नास्यादित्यर्थः। चैत्रमैत्रात्मनोरीश्वर
रूपयोरित्यादितिभावः। ननुकथंतर्हितत्त्वमसीत्यादितच्छब्दसामानाधिकरण्यप्रतिपाद्यब्रह्मणियुष्मच्छब्दप्रतिपाद्यजीवस्या
भेदथोबंधमोक्षयोर्भेदः प्रमाणमित्यतआह। योपीति। मोक्षकालेजीवात्मनाब्रह्मणासहाभेदउच्यतइतिमतंनिरस्य
ति। मोक्षेति। भेदस्यानित्यत्वंभवेत्यादिमोक्षकालेजीवब्रह्मणोर्भेदंश्रुतिर्व्यवस्थापयतिभेदनाशइतिभेदस्य
त्वेअस्मिन्नर्थेवादमेवेसंविनास्तितंतथाचेदंनिःनिर्धर्मिकइति। इदंचसत्यत्वाभावेपीसमर्थहेतुत्वंमो
क्षे। ननुनिर्धर्मिकंस्वप्नेधर्मशून्यंमिथ्याभावरूपंसत्यत्वस्यब्रह्मरूपत्वाद्भावस्यचाधिकरणात्म
कत्वान्नानुपपन्नमित्यभिप्रायेणशंकते। मिथ्याभावइति। ननुकथमेकत्वाधिकरणतदभावरूपंहित्यत
आह। सत्येकमिति। ब्रह्मणि हुलेभर्थेतिश्रुतेर्मोक्षदशायामभेदउच्यतइत्यर्थेयायाःकाश्रुतिरतआह। योपि
तदानीमिति। अतएवब्रह्मैवेश्वरभवतीतिश्रुतेःसाम्यप्रतिपादकत्वादेवनिरंजनः। निर्दुःखः। हीतियेदोषमाह। ई
श्वरोपीतिविज्ञानपदेन। नित्यमित्यादिश्रुत्यंतर्गतनित्यविज्ञानपदेन। अधिकरणत्वंतुविज्ञानपदेनविशे
नाश्रयबोधनादितिभावः। आनंदइतिश्रुतिरिति। अस्यार्थः नृप्यमाणेनानंदशब्देनानंदगुणोबोधनादन्य
थानंदमितिनपुंसकत्वानुपपत्तिरितिभावः। नन्वानंदइतिश्रुतेर्भेदोसंगच्छते। तथमतेत्वीश्वरेआनंदाभा
दतआह। आनंदोपीति। लक्षणाकल्पनमेवतत्रदोषइत्यतआह। असुखमितीति। असुखमित्य

अनआह्लजिसुखभेदबोधनादितिभावः।कष्टकल्पनापत्तेरिति।बहुव्रीहावन्यपदार्थलिङ्गसंख्ये अस्तत्रेक्षणापत्तेरित्यर्थः।नभूतपुरुषवेदिनश्चेक्षणाआवश्यकी।अन्यथानञोघस्यनामार्थतयाभेदान्वयासंभवादितिभावः।तस्यनामत्वेविनिपातत्वादिति।ननुअस्तपुरुषवेदितृत्रासुरवपदब्रह्मपदयोरेकधर्मिबोधकत्वलक्षणंसामानाधिकरण्यमनुभवसिद्धं।अन्यथातयोःसामानार्थ्यंनस्यान्नुपपत्तेरतस्तन्निर्वाहार्थमजाःभावयतिलक्षणानथाप्यायणीत्यतआह।प्रकरणेतिप्रत्ययविरोधादिति।आनन्दाद्यर्थस्यपुंस्त्वेगत्यनियमेनानन्दमितिरूपस्यमत्वर्थीयाभावप्रत्ययविरोधानुपपत्तेरितिभावः।सांख्यमतंदूषयितुमुपन्यस्यति।एतेनेति।पूर्वोक्तयुक्त्याआत्मनोज्ञानंयत्साधनेनवक्ष्यमाणयुक्त्याचेत्यर्थः।महतिरिति।मूलप्रहरतिरित्यर्थः।कर्त्रीतिकर्तृत्वंचात्रकर्तृकृतेतिकरणमहत्तत्वं।अनुकूलहरतिमत्सत्त्वलक्षणकर्तृत्वं ५० स्यतन्मतेअंतःकरणधर्मत्वादितिध्येयं।पुष्करपलाशवदिति।पद्मपत्रवदित्यर्थः।तथाचयथापद्मपत्रं भाषा ११ मृन्मयसालिसंनभवतितथापुरुषःकर्तृत्वाद्याश्रयोनभवतीतिभावः।तत्राचपुरुषःकर्तृत्वाभावेधान्यकरणा दिमनुमानेतत्प्रमाणंबोध्यं।ननुतद्वैकारणत्वंसत्त्वादेरसिद्धिरतआह।कार्यकारणयोरिति।नस्या दिति।भावयतीत्यर्थः।नस्यापुरुषस्य।नन्वेतादृशपुरुषसत्वेकिंमानमतआह।बुद्धिगतेति।क्वचित्त्वसिद्धं स्वेवचैतन्यस्यबुद्धावारोपसंभवादितिभावः।प्रहरतेरिति।मूलप्रहरतेरित्यर्थः।ननुपुरुषस्यकर्तृत्वाभा वेतत्रधर्मधिर्मयोरसंभावात्तदधीनसुखदुःखयोस्तत्रानुसन्धौदुरवधंसरूपमोक्षःपुरुषस्यनस्यो

दतआह।तत्संसर्गाभ्यामिति।बुद्धिसत्वासत्वाभ्यामित्यर्थः।बुद्धिसत्वेइंद्रियप्रणालिकयातत्परिणामेनायं घटइतिज्ञानेनसंबद्धोघटादिर्विषयः।स्वाकारज्ञानपरिणामिबुध्यवग्रहात्तासंसर्गकृतसंबंधेनपुरुषनि ष्ठःपुरुषस्यरूपतिरोधानेनपुरुषस्यसंसारसंपादकःबुद्धिनाशेतुतत्परिणामस्यायंघटइत्यादिज्ञानरूप स्याभावाद्विषयावच्छेदाभावात्कैवल्यायस्यानंपुंसोमोक्षः।दुःखसंबंधेतध्वंसोसंसारमोक्षोनपुंसः किं नुबुद्धेरेवेतिभावः।ननुपुरुषेसाक्षात्संबंधएवविषयस्यास्तुसएवंचतस्मिन्संसारध्वंहारनियामको स्तुकिमुतबुद्धिघटितपरंपरासंबंधेनेत्यतआह।नस्याएवेति।तथाचविषयेबुबुद्धेरसंबंधःपुरुष संबंधःबुद्धिपुरुषयोरसंसर्गग्रहात्।ननुपुरुषेस्तुतेनविषयसंबंधोस्ति।मानाभावात्।नचविषय प्रकाशार्थमेवास्यसंबंधएवस्वीकार्यःकिमुतरूपरंपरयेतिवाच्यं।नस्यपुरुषस्याधानिबंधनत्वेपुरुषस्यनि त्यत्वेनतस्याधीनविषयसंबंधस्यसर्वदासत्वान्मोक्षाभावप्रसंगात्।घटप्रकाशकाले घटादिरूपवि षयरूपाभावोनस्यपटादिरूपचैतन्यबंधस्यसत्वात्सदैवचिप्रकाशापत्तेरिति।यद्वा।बुद्धेर्ज्ञानस्य सं १० भेदमाह।नस्याएवेति।तच्चबुद्धेःपरिणतिर्नतुबुद्धिरेवेतिभावः।भेदाग्रहादिति।बुद्धिपुरुषयोर्भेदा भा ११ ग्रहादित्यर्थः।इदंनोबुद्धिरुपलब्धेर्भेदमदर्शनायबुद्धेरंशत्वंमदर्शयति।ममेदमित्यादिना।पुरुषोपरक्तः।पुरुषसंबंधः।दर्पणस्ययथामुखसंबंधःप्रतिबिंबमात्रान्नतुतात्त्विकरूपाबुद्धिपुरुषयोर्भेदाग्रहा

देकत्वाभिमानः पुरुषोपरागइत्यर्थः। इंद्रियमणालिकया। इंद्रियद्वारा। परिणामिनिवेदः। अयंघटइत्यादिज्ञानरूपः
परिणामएवविषयेणघटादिनाबुद्धेःसंबंधइत्यर्थः। तस्यपारमार्थिकत्वेनिश्चासन्निहितदर्पणस्यमलिनिमा
दृष्टांतः। कर्तृधर्मइतिपूर्वेणपुरुषोपरागविषयोपरागाभ्यांकर्तृत्वस्यघटादेरध्यासस्तेनकर्तृधर्मित्वध्यव
सायोध्यासइत्यर्थः। ज्ञानेनपुरुषस्यातात्त्विकःसंबंधइति। अत्रज्ञानेनपुरुषस्ययोअतात्त्विकःसंबंधस्तदु
पलब्धिरत्यंतस्यन्ययः। अतात्त्विकदृष्टांतोदर्पणमलिनिमेवमुखस्यसंबंधइति। तथाचज्ञानेनसहचेतनो
हमिदंजानामीत्याकारोबुद्धावाश्रितस्ययःसंबंधोतात्त्विकःसाऽपलब्धिर्नतुबुद्धिरेवोपलब्धिरितिभावः।
इतिसामानाधिकरण्येनेति। अहस्यादिद्रष्टेपिधर्मिणेहंकरोमीतितदेवोपपन्नंनभवतस्तद्भोग्यं। परि
णामित्वादिति। अनित्यधर्माश्रयत्वादित्यर्थः। हृत्यदृष्टभोगानामिवेति। इतिःस्वसमानाधिकरणमदृष्ट
जनयति। तथादृष्टस्यसमानाधिकरणमेवभोगंजनयतीतिहस्यदृष्टभोगानांपरस्परसामानाधिक
रण्यप्रमितिरयंचेतनोहंकरोमीतिसामानाधिकरण्यप्रमितेरित्यर्थः। तद्धिन्नेति। कर्तृभिन्ने। मानाभा
वादिसस्यचेतनइत्यादिः। चःपूर्वेणदूषणसमुच्चायकः। कर्तृत्वाश्रयोनचेतनः। अन्यधर्माश्रयत्वा
दघटवदितिबाधकसत्त्वाच्चेतनोहंकरोमीतिप्रतीतिर्नचान्यांशेभ्रमइत्याशंक्यते। चेतनोहमितिहर
स्यंशेपीति। बुद्धिःकर्तृत्वाभावधर्मिअन्यधर्माश्रयत्वादितिबाधकस्यतत्रापिसत्त्वादिति। अन्यथे
ति। कर्तृचेतनयोर्भेदांगीकारइत्यर्थः। बुद्धेर्निश्चयइति। कर्तृभिन्नस्यचेतनस्यांगीकारेतस्मिन्नपु

५१

५१

स्यदुःखाभावात्संसारमोक्षयोरनुपपत्तापूर्वेनिरात्मबुद्धिसत्त्वासत्त्वाभ्यामेवसंसारापवर्गौवाच्यौ। तथा
चबुद्धेर्निश्चयेतत्सत्त्वनिबंधनस्यसंसारस्यसर्वदाऽपपत्तेर्मोक्षाभावएवस्यात्। बुद्धेरनित्यत्वेनुअ
न्यत्वंकरणीयमजन्यस्यनाशासंभवात्तथाचतदुत्पत्तेःपूर्वंतत्सत्त्वनिबंधनःसंसारोनास्तीत्यर्थः।
धरूपतत्त्वंतदुत्पत्तेःपूर्वंतदाश्रिताद्दष्टादेरभावाद्बुद्धेरनुपपत्तासंसारःकदापिनस्यादित्यवधेयं। अ
सिद्धेरिति। बुद्धेरप्रसिद्धिरित्यर्थः। कार्यत्वाभावादित्यर्थः। ननुकर्तृत्वेनजन्यत्वानुमितेःपरिशेषात्प्रहानिजन्यत्व
विषयिणीस्यादतआह। कर्तुरिति। कर्तृत्वस्यजन्मृत्यव्याप्यत्वेनुकुतःकर्तृभावादित्यर्थः। प्रत्यक्षतः
हिपरातनादित्यग्राहकतर्कसत्त्वादनादित्वमेवकर्तुरित्याह। वीतरागेति। वीतरागजन्मादर्शनादिति
व्यतिरेकसूत्रं। सरागजन्मदर्शनादितिदत्तर्थः। अनादित्वमिति। स्तनपानेबालस्यप्रवृत्तिर्नेष्टसाधनता
ज्ञानंतरेण। सत्रनानुभवस्यरूपंबाधात्। स्मरणस्यस्वसमानाधिकरणपूर्वानुभवसापेक्षतया
पूर्वजन्मसत्त्वेपूर्वजन्मन्यविप्रथमप्रत्यनुरोधेनतत्पूर्वस्यएवंतत्पूर्वस्यतत्पूर्वस्यजन्मनः
सिद्धेअनादित्वमात्मनइतिभावः। अनादित्वस्यस्वभावस्यनिश्चेषः। जन्यभावत्वेनानाद्यहेतुत्या
दितिभावः। नचमहतेरिति। प्रहानिर्मोक्षतस्यागुणेस्मत्परजस्तमोलक्षणेः क्रियमाणानिकर्मा
णिभवंति। अहंकारोहमितिप्रत्ययस्तेनविमूढआत्मातंकरणंस्वस्यतथाविधःपुरुषःकर्ताहमिति

मन्यतइत्यर्थः।तेनात्मनःकर्तृत्वाभावप्रतिपादनादिति भावः।अहमेवेति।तथात्वतेनस्वतं
त्रकर्तृत्वाभावएवआत्मनिप्रतिपाद्यतेननुकर्तृत्वसामान्याभावइतिभावः।प्रकटीहरतीयमिति।अधिष्ठानंतथाक
र्तृकरणंचेष्टाश्चविधंविधाश्चेष्टाधकूचेष्टादेवंयोजनापंचमीत्यनेनचेष्टानामपिकर्तृत्वंप्रतिपाद्यतत्रैवंसती
त्यादिनास्वतंत्रकर्तृत्वस्येवात्मनोनिषिद्धत्वादितिभावः।एवंपुरुषस्येवकर्तृत्वमस्तूनचकारणाभावेनकर्तृ
त्वाभावस्तत्रसाधनाद्यमितिवाच्यंस्वरूपासिद्धेः।कार्यकारणयोरभेदात्कार्यनाशेकार्यरूपतयानाशःस्या
दित्यकारणंपुरुषस्येत्यपिनसत्।कार्यकारणयोरभेदस्येवासिद्धत्वादित्यादिविस्तरभियानोक्तमित्य
लिमतिमूढानाह।संक्षेपइति।तदाश्रयते।धर्माधर्मावाश्रयते।अन्यथा।विशेषगुणसंबंधादृते।इत्यादिमतीतेरि
ति।इत्यादौज्ञानादिसंबंधप्रकारेणेत्यात्मनःप्रत्यक्षस्यानुभवादित्यर्थः।परकीयमदृष्टादरतोद्वियत्नेनहे
तुज्ञानासंभवात्स्वरूपासिद्ध्याह।प्रवृत्तिरितिउक्तमायत्नादिति।शरीरस्यनचेतन्यमित्यनेनोक्तमेवादि
त्यर्थः।इच्छादीनामभावस्यकंठरवेणानुक्तेःमायःपदंचेष्टायाश्चप्रवृत्तिसाधकत्वेऽनुकूलतर्कमाह।चेष्टा
यांसत्यांचेति।चेष्टयेति।परशरीरेसमवायेनचेष्टानुमितस्यावछेदकतयाप्रयत्नस्यसमवायेनाश्रयत्व
आत्मैवेतिभावः।आत्मनोमनोमात्रजन्यज्ञानविषयत्वेहेतुमाह॥रूपाद्यभावेनेति।विभुत्वमिति।कालस्वा
त्मदिशांसर्वगतत्वंपरमंमहत्।इत्यनेनात्मनिपरममहत्त्वस्योक्तेःपौनरुक्त्यमाशंक्याह।तत्रेति।पूर्वमुक्ताद्
इति।बुध्यादिषट्कंसंख्यादिपंचकंभावनातथा।धर्माधर्मगुणाश्चेतआत्मनःस्युश्चतुर्दशेत्यनेनसाधर्म्यप्रकरणे

फलितमाहइत्यर्थः॥॥इतिश्रीभरद्वाजकुलोद्भवबालहरिभट्टतनूजमहादेवभट्टसुतोमुक्तावलीप्रकाशेद्वि
तीयःपरिछेदः॥२॥॥छ॥मूलेबुद्धिरुद्दिष्टेतिमतावनुभूतिःस्मृतिश्चेत्यादिना।तत्रानुभूतिःप्रत्यक्षा
लिंगेतिचार्थिकाः।अनुमितिरुपमितिरुपपत्तेर्गतौ।उपमितिरुपमितेर्न्यायाधिकेकृदेतिनिर्णयः।अर्थापत्ति
रुपपत्तिरित्याभाकराः।अनुपलब्धिरुपपत्तिभट्टावेदांतिनश्चैसंभवेतिसंघरूपापत्तिरितिपौराणिकाः।तत्सर्वम
मयुक्तमितिसूचयितुंमनुभूतेश्चातुर्विध्यमाह।अनुभूतिश्चतुर्विधेति।अनुमितोपमितिशब्दा
मितिप्रतीतिसिद्धानामनुमित्यादीनांदुर्धरतयाचार्थिकोदितमयुक्तं।अर्थापत्तेस्त्वनुमिता
वंतर्भावोव्यतिरेकिग्रंथेव्यक्तोभविष्यति।अनुपलब्धेस्त्वभावएवांतर्भावः।अन्योन्याश्रयभयाभ्यामनुमि
त्यादावंतर्भावइतिभावः।उद्दिष्टासुप्रमासुप्रथमोपस्थितेत्वात्प्रत्यक्षंलक्षयति।मुख्यायव्याइंद्रियज
न्यमितिं।इंद्रियजन्यमित्यमितिंद्रियरूपादावव्याप्तस्मृतौज्ञानमिति।अनुमित्यादावतिव्याप्तिवारणायेंद्रियज
न्यमितिं।इंद्रियजन्यत्वंशेषणदानेप्यनुमित्यादावतिव्याप्तिस्तदवस्थैवाशंकतेयद्यपीति।नन्विंद्रियज
न्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरतआह।ईश्वरप्रत्यक्षंसंतीति।तथाचजन्यप्रत्यक्षमेवलक्ष्यमितिभावः।
ननुतर्हीश्वरलक्षणेकिंमानमतआह।इंद्रियार्थेति।इंद्रियार्थसन्निकर्षजन्यमित्यनेनेश्वरप्रत्यक्षमनु
मित्यादिव्यावर्त्ततेऽयमर्थःकारणमाह।अव्यभिचारीतिअयमभिप्रेतमित्यर्थः।एतावताप्रत्यक्षप्रमाया

लक्षणमुक्तं तद्भागमाह। अव्यपदेश्यमिति। निर्विकल्पकमित्यर्थः। नन्वव्यपदेशकथं निर्विकल्पकलाभ
इत्याशङ्क्य। व्यपदेशः पदं तच्छब्दं तद्विषयकमित्यर्थः। हि शिष्टज्ञानं शब्दाव्यत्वमुपनीतभासं तइति साचि
नमतानुसारित्याह। अतएव कणादः कणादनामानं मुनिमित्यादि तत्र तत्रोक्तसंगच्छते। यद्वा व्यपदेशः शा
ब्दमयोगः सचविशिष्टज्ञानं देवदत्तव्यपदेश्यत्वेनव्यपदेशार्हत्वेननिर्विकल्पकलाभः। व्यवसायात्मकं
मिति। विशिष्टव्यवसायात्मकमित्यर्थः। विशिष्टज्ञानात्मकमितियावत्। एवंसूत्रेइंद्रियार्थसन्निकर्षो
त्पन्नमप्यस्मिन्चारिअव्यपदेश्यव्यवसायात्मकमितियोजनाबोध्या। अन्यथा लक्षणाव्याप्तेरिभागवो
धकपदेनव्यवधानादसंगतेरिति। नचेदंयत्तत्तथादिति। ईश्वरप्रत्यक्षालक्ष्यत्वस्येष्टत्वेपिप्रेतत्वादित्यर्थः।
ईश्वरप्रत्यक्षस्य लक्ष्यत्वमस्मिन्मतेस्याह। अथवेति। ज्ञानाकरणकमिति। ज्ञानाजन्यमित्यर्थः। नाव्याप्तिः।
विशिष्टज्ञानमात्रस्यविशेषणज्ञानजन्यत्वादतोज्ञानाकरणकमिति। अनुमित्यादौव्याप्त्यादिज्ञानस्यकर
णत्वमस्मेवेतिनानुमित्यादावतिव्याप्तिः। अकरणकत्वादेवचेश्वरज्ञानसंग्रहः। अथनिदिध्यासनद्वारा
मननादिज्ञानकरणकेयोगिप्रत्यक्षेलक्षणमिदमव्यापकमितिचेन्न। ज्ञानोकरणकपदेनज्ञानत्वावच्छि
धर्मावच्छिन्नकरणकत्वाभावस्यविवक्षितत्वात्। नचेदंयोगिप्रत्यक्षाव्यापकं। आदिपदेनसंग्रहा
शब्दत्वादिनैकजनकत्वेनविशिष्टाभावस्त्वादिति। अथवाज्ञानकरणकत्वाव्यभिचारिजातिशून्य

DEBHAU DAS

ज्ञानत्वमिहविवक्षितं। तादृशजातिरनुमितित्वादिरेवेति। एतेनानुमित्यादौव्याप्तिज्ञानादेर्नित्यकारणतानये
ज्ञानत्वघटितकारणतावच्छेदकधर्मप्रसिध्या संभवोपिप्रत्यक्षस्येति। व्याप्तिज्ञानस्येतिषष्ठ्यंतंचतुष्टयस्यक
रणत्वादित्यनेनान्वयः। नचस्मरणात्मकपरामर्शस्यैव्याप्तिज्ञानस्यकरणत्वासंभवइतिवाच्यं। तज्जन्यव्याप्तिज्ञा
नस्यसंस्कारद्वाराहेतुत्वात्। नचज्ञानपदस्यप्रमाविषयकपरत्वमेवास्तांकिंव्याप्तिज्ञानस्यसंस्कारद्वारानत्वहेतुत्व
कल्पनेनेतिवाच्यं। इच्छादितःसंस्काराच्यानुमितेरनुदयात्प्रमाविषयकत्वस्यातिप्रसक्तत्वात्। साक्षात्प्रत्यक्षज्ञा
दृश्यप्रकारकज्ञानस्य। तत्रानुमित्यादौ। अनुमितिंलक्षयति। परामर्शेति। परामर्शंप्रतिव्याप्तिविशिष्टपक्षधर्म
ताज्ञानत्वं। तथाचव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यंज्ञानमनुमितिरितिफलितं। पर्वतोवह्निव्याप्यधू
मवान्पर्वतइतिज्ञानंव्याप्तिविशिष्टपक्षधर्मताज्ञानंतज्जन्यंपर्वतोवह्निमानितिज्ञानमितिलक्षणसमन्वय
यः। यद्यपीत्यादिप्रत्यक्षादिकमित्यादिनाविशेषणतावच्छेदकप्रकारकनिश्चयविधयापरामर्शजन्यस्यवि
शिष्टवैशिष्ट्यबोधस्यपरिग्रहः। परामर्शजन्यमिति। विषयविधयातत्रपरामर्शस्यहेतुत्वादितिभावः। का
दाचित्केति। धूमवान्पर्वतोवह्निमानित्यनुमितौपक्षतावच्छेदकविधयाधूमस्यभानादितिभावः। ताद्दशेति।
कथितनिश्चयजन्यहेत्वविषयकेत्यर्थः। स्मृत्यादायातिव्याप्तिरतोनुभवेत्यादेत्यनुभवत्वन्यू
नत्वनित्यंतदर्थः। तेननानुभवत्वजातिनादायप्रत्यक्षादावतिव्याप्तिः। जातिमत्त्वंचसमवायेनविवक्षितं।
तेनकालिकसंबंधेनजातिमतिकालेनातिव्याप्तिः। पक्षधर्मतायाभ्रमत्वेनेत्यलाघवात्। लक्षणांतरमाह।

अभ्येति। अत्रापि साध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधहेतुतावच्छेदकधर्महेतुतावच्छेदकसंबंधानामननुगमादेकव्यास्युपादानेऽनुमितित्वव्याप्तेरकांतव्याप्तिमुपदर्शयति। ज्ञानकरणकत्वमनुभवत्वव्याप्यजातिमत्त्वविवक्षणीयं। नन्वनुमितिप्रत्यक्षयोर्व्याप्तिज्ञानत्वेनैवकरणत्वं किंतु ज्ञानत्वेन मनस्त्वेनेवेति चेन्मनस्त्वेनैवकरणत्वं। नचैवं सति मनस्त्वादितिवाच्यं। सामग्रीवैलक्षण्यादेवैतदुपपत्तेः। नचैवमप्रमाणेऽप्रमागानुपपत्तिः। क्रियाविशेषाद्वा तदुपपत्तेरतः पूर्वोक्तानुमित्यादिलक्षणानामसंभवइत्याह। यत्कृतइति। घटोऽस्तीत्यास्तिधारणायत्नः क्रियते। तत्र यदा समवायेनेंद्रियवृत्तिर्ज्ञाता। तेनानुमितौ काले कथं घटत्वस्य तत्रेंद्रियवृत्तिरपि नास्तीत्यास्तिधारणायत्नः। ज्ञानत्वानुभवत्वसामान्ययोः प्रत्यक्षादावतिव्याप्तिधारणायविशेषदलं। ननु मनसः करणतापक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तमतः प्रत्यक्षस्यलक्षणांतरमाह। एवमिति। प्रत्यक्षत्वादिकमिति। यत्किंचिदुपमितिव्यक्तिमादायतद्व्यक्तिरुपमितिप्रत्यक्षसमवेतजातिमत्त्वं। यत्किंचिच्छाब्दबोधव्यक्तिमादायतद्व्यक्तिरुपमितिप्रत्यक्षसमवेतजातिमत्त्वंशाब्दबोधत्वंनिर्वक्तव्यमित्यर्थः। शाब्दभेदानुमित्यादिनांलक्षणकथनमनुभवजन्यसंस्कारकरणतद्जन्यसंस्कारेतद्व्यक्तिसमवेतस्मरणसमवेतधर्मसमवायित्वरूपस्यलक्षणस्यतत्तद्व्यक्त्यव्याप्तेरभावत्वंशाब्दबोधत्वादितिध्येयं। उक्तसूत्रेति। इंद्रियार्थसन्निकर्षोत्पन्नमित्याद्युपदर्शितसूत्रानुसारादित्यर्थः। घ्राणस्यानिंद्रियत्वकथनादाह। घ्राणेत्यादि। सुरभिचंदनादिनासुरभिचंदनादिपरिग्रहः। तद्भवतीति। गंधवत्त्वेत्यर्थः। उद्भूतपदस्यहरत्वमाह। प्रोद्भूतेति।

उद्भासविशेषादिनाभूर्णमविष्टतेजःपरिग्रहः। ततस्यप्रत्यक्षं। औष्ण्यादिगतरूपमप्रत्यक्षं। न्यूनतांपरिहर्तुमाह। एवत्वादिकमपीति। आलोकसंयोगेति। एतस्यचकारणत्वंबंधकोटेश्चाकूपारायणाय। उद्भूतरूपस्यतुपित्ताद्यादौनांप्रत्यक्षधारणायेत्यबंधेयं। तयोरुद्भूतरूपालोकसंयोगयोः। रूपमिन्नस्परूपादेस्त्वंगीकृत्येणाग्रहणादाह। रूपत्वादिभिन्नमिति। आदिनानीलत्वादीनांपरिग्रहः। इत्याद्यध्यक्षइतिपूर्वान्वयिनहत्तरान्वयीतिबोधयितुंरूपमत्राविकारणंद्व्याध्यक्षइत्यंतमतीकृधारणमंकते। बहिरिंद्रियेति। ननुकार्याभावेकारणाभावस्यमयोजकतायागगनादौबहिरिंद्रियजन्यप्रत्यक्षाभावेरूपाभावस्यशीघ्रबोधयोःप्रयोजकत्वकल्पनेगौरवात्तादृशप्रत्यक्षरूपत्वेनहेतुतांकल्पयितुंतादृशज्ञानाभावत्वेनैवतादृशप्रत्यक्षाभावेमयोजकत्वमुचितमित्यतआह। आत्मेत्यादि। आत्मनोबहिरिंद्रियजन्यप्रत्यक्षधारणायात्मेत्यादि। आकाशस्यबहिरिंद्रियजन्यप्रत्यक्षधारणायशब्देत्यादि। कालादेतद्धारणायविशेषेति। अंकते। रूपस्येति। पुनरंकते। इष्टेति। प्रतिबंधोत्तरयति। उद्भूतेति। उपसंहरति। तस्मादिति। ननुतटेस्पार्शनंनांगीकारात्तत्स्पार्शनधारणायस्पार्शन्यद्रव्यसमवेतस्पार्शनंप्रतितंत्रमुक्तस्पार्शनत्वसमवायस्यहेतुत्वसंभवायेत्यतआह। यायोःस्पार्शनांगीकारोनोचितः अन्यथायुगपत्संख्यापरिमाणयोःस्पार्शनांगीकारेबाधापत्तेरित्याशयः। उक्तंहिभाष्यकारैः। द्रव्यगुणकर्मसु सामान्यविशेषसमवायेषु च प्रत्यक्षमुत्पद्यते। द्रव्येषु पृथिव्यप्तेजोवायुमनःसु। गुणेषु रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नेषु। कर्मसु उत्क्षेपणावक्षेपणाकुंचनप्रसारणगमनेषु। सामान्येषु द्रव्यत्वगुणत्वकर्मत्वसामान्यविशेषेषु। विशेषेषु नित्यद्रव्यवृत्तयोऽंत्याविशेषाः। समवायेषु समवायः। इति। अत्रापि यायोरिति प्रभोपादानेदृष्टांतार्थं। उद्भूतएवेति। तथाचयायुगपत्संख्यादिग्रहेइष्टापत्तावयोःस्पार्शनांगीकारेबाधकाभावइतिभावः। धूचिदिति। सजातीयसंयोगाभावइत्यर्थः। आदिपदात्परिमाणपरिग्रहः। तद्ग्रहश्चप्रमोदयथाधर्मेणेत्यनेंद्रियसन्निकर्षस्यलेबोध्यः।

ननुसजातीयसंयोगनदृष्टायांकार्योत्पत्तौयद्यपेक्षेदनत्वमिंद्रियसन्निकर्षाभावेचकथंनयायुगपद्ज्ञानपरिमाणयोर्ग्रहइत्यत
आह।क्वचित्संख्यापरिमाणेति।दोषादिति।सजातीयसंयोगरूपादोषादित्यर्थः।आहुरित्यनेनास्वरसस्तद्दीजंतु
यायोःप्रत्यक्षतासंदेहेनलाघवान्मूर्तप्रत्यक्षत्वावच्छिन्नंप्रतिहेतुत्वेनैवकारणत्वमुचितं।नचयथामूर्तप्रत्यक्षतासंदेहाधीन
व्यभिचारसंदेहस्यप्रतिबंधकस्यसत्वात्कथंकारणताग्रहइतिवाच्यं।लाघवतर्कभावविशिष्टस्यैवव्यभिचारसंदेह
स्यप्रतिबंधकतयाग्रहतंत्रत्वेनोक्तलाघवतर्कस्यसत्वेनतदभावविशिष्टव्यभिचारसंदेहाभावस्यसुग्राह्यत्वात्।अथवा
प्रभायाअप्रत्यक्षेविशिष्टापत्तिरित्येवकिंनस्यादितितदर्थिनाऽपरिदेवनविहंगमइत्यत्रप्रभामंडलस्यैवोपरिदृश्यत
यातत्प्रत्यक्षंविनोपरिदृश्यविहंगमइतिप्रत्यक्षानुपपत्तेरित्यादिकमिति।ज्ञानसामान्ये।जन्यज्ञानसामान्ये।ज्ञा
नाजननमिति।प्रमाणमित्यनुषज्यते।चक्षुरादीत्यादिनात्वगादिपरिग्रहः।तदभावादेव।चक्षुरादिनामनोयो
गाभावादेव।ज्ञानादेरभावादेवनमानसमिति।अत्रज्ञानादेर्मानसेनमित्यन्वयः।अभावादित्यपिज्ञानादे
रित्यस्यान्वयोबोध्यः।नप्रत्यक्षमिति।योग्यगुणसंबंधेनात्मनःप्रत्यक्षत्वीकाराद्योग्यविशेषगुणप्रत्य
क्षसामग्र्यतर्गतस्यज्ञानादेरभावादेवनात्मप्रत्यक्षमित्यर्थः।डहोधकाभावादिति।डहोधकस्यकलबलकल्पत्वा
दितिभावः।इच्छादिष्वपीति।इच्छाद्योऽदिरितियुक्तस्याज्ञानेमत्वर्थीयइच्छितं।तदर्थीद्रियत्वे।ज्ञानार्थीद्रियत्वे।
ननुसुषुप्तिप्राक्कालीनज्ञानस्यनिर्विकल्पकरूपत्वेनतदर्थीद्रियत्वमुभयवादिसिद्धमेवेत्यतआह।सुषुप्ति
प्राक्कालेति।सत्यमनःसंयोगस्येति।तदर्थीकारेचाक्षुषमपिनस्यादितिभावः।ननुचाक्षुषादिसा

मग्र्याःस्वारसिकंप्रतिबंधकत्वादेवनस्यान्नियंतव्येत्यतआह।परस्परेति।अनुभवानुरोधादिति।अनुभवस्य
त्वापिस्वहस्तितत्वादन्यथाऽष्टापत्त्यादिनाऽदुःखापत्तेरसंगतत्वापातादितिभावः।मिश्रमतमाह।अन्येत्वि
त्यादिना।सुषुप्त्यनुरोधेनेतिसुषुप्तौज्ञानानुत्पादानुरोधेन।इत्थंचचाक्षुषादिकालेपूर्वोक्तासामग्र्यानियतपतिरहि
नभवतीत्याह।चाक्षुषादीति।अत्रनथाः।सुषुप्त्यव्यवहितप्राक्कालेज्ञानोत्पत्तिर्यदिस्यात्स्यादितत्प्रत्य
क्षापत्तिरियंचउन्मनोयोगस्यचमनोयोगस्यथाहेतुत्वंसेवंनयुक्तिसिद्धा।तथाहि।सुषुप्तेनानुकूलमन
नःक्रियामनसाआत्ममनोविभागस्तताआत्ममनःसंयोगनाशस्ततःपुरीततिरूपेणोत्तरदेहेनमनसा
संयोगरूपासुषुप्तिरुत्पद्यते।एवंचसुषुप्त्यव्यवहितपूर्वक्षणेआत्ममनःसंयोगरूपासमवायिकारणना
शात्तत्क्षणेज्ञानोत्पत्तेरभावात्।असमवायिकारणस्यकार्यसहभावेनहेतुत्वात्।यदिचकार्यनाशजनक
नाशप्रतियोगिनएवासमवायिकारणस्यकार्यसहभावेनहेतुत्वमितिमन्यतेतथापिनसुप्त्यव्यवहितप्रा
क्कालेतन्नज्ञानध्वंसेःसुषुप्तिकालेप्रत्यक्षापत्तिरियाचउन्मनःसंयोगादेर्हेतुत्वंविजातीयात्मनःसंयोगहेतुत्वे
नेयत्तयेत्यवधारणात्।नचयेनात्मनःसंयोगस्यचउन्मनःसंयोगस्यथाहेतुत्वमितिवक्तव्यमिति
भावः।चउन्मनःसंयोगादेरवच्छेदकतासंबंधेनहेतुत्वापेक्षायासमवायेनात्ममनःसंयोगस्यतत्रेलाघवात्।
चउन्मनःसंयोगहेतुत्वेचाक्षुषादिसामग्र्याःस्वारसिकप्रतिबंधकत्वकल्पनागौरवाच्च।एतेनयत्रमनःक्रि
यामनपुरीततिसंयोगरूपासुषुप्तिःकिंतुपुरीततिक्रियायेवात्मसंयुक्तेनमनसापुरीततिसंयोगरूपा

सुषुप्तिस्तत्र पूर्वेरापत्तिधारणायत्वङ्मनःसंयोगादेर्हेतुत्वमित्यपास्तं। पुरीततिक्रियाजन्यमनःपुरीततिसं
योगस्यसुषुप्तिभाथाश्च। अतएवयदाचंक्रमनेःपुरीततिमनुविधत्तेतिग्रथकाराणांलेखः संगछ
तइतिदर्शनं। मनोग्रात्यत्यस्यसार्थत्रिकत्वादाह। मनोजन्येति। मनोमात्रजन्येत्यर्थः। न्यूनतांपरिहरति। एव
मिति। निर्विकल्पकेप्रमाणादर्शयति। चक्षुःसंयोगादीति। विशेषणज्ञानस्यकारणत्वादिति। कदाचित्
घटइत्याद्याकारकंस्वरूपतोघटत्वप्रकारकंकदाचिन्नजातिमानितिजातित्वेनघटत्वप्रकारकंज्ञानंजायत
इत्यनुभवसाक्षिकतन्निर्वाहायघटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धेतादृशघटत्वज्ञानत्वेनघ
टत्वांशेजातित्वप्रकारकघटत्वविशिष्टबुद्धेचतादृशघटत्वज्ञानत्वेनहेतुत्वस्यावश्यकत्वादितिभावः।
वैशिष्ट्यानवगाह्येवेति। वैशिष्ट्यनिष्ठसांसर्गिकविषयतानिरूप्यमेवेत्यर्थः। वैशिष्ट्यसांसर्गिकविष
यतानिरासेनैवघटघटत्वयोर्विशेष्यतात्वप्रकारतानिरूप्यत्वलब्धंतयोर्वैशिष्ट्यसांसर्गिकविषयतानि
यतत्वात्। नचैवंनिर्विकल्पकस्यनिर्विषयकत्वापत्तेः। तुरीयविषयतायाएवतत्रांगीकारात्। एतेननि
र्विकल्पकस्यघटघटत्वावगाहित्वंघटत्वविशिष्टावगाहित्वमविदुषांरूपटद्रव्यसन्निकर्षकालेरूपि
यसंबद्धविशेषणतायातद्वैशिष्ट्येसत्यादितिवैशिष्ट्यानवगाहित्वोक्तिरसंगतत्यपास्तं। वैशिष्ट्या
नवगाहित्वेवेत्येवकारेणकेवलनीयविशेषणज्ञानस्यवैशिष्ट्यावगाहित्वंतस्यापिविशिष्टबुद्धित्वा

५६

५६

विशेषणज्ञानंतरसापेक्षतास्यादेवंतस्यापिवैशिष्ट्यावगाहित्वइत्यनयस्यापियाप्राग्भिकविशेषणज्ञा
नंवैशिष्ट्यानवगाह्येवस्वीकार्यमितिसूचितं। तदेवाहतादृशविषयतात्रयशून्यमेव। निर्विकल्पकं। निर्वि
कल्पकस्वरूपं। क्षणंतुप्रकारतादिशून्यत्वादिकंप्रत्येकमेवेतिबोध्यं। निर्विकल्पकेमूलोक्तमतीद्वियत्वं
साधयति। तथाहीत्यादिना। ज्ञानस्यप्रत्यक्षविषयानवगाहिभवतीत्यन्वयः। इतिप्रत्ययादिति। इति
घटावगाहित्वेनैवज्ञानस्यप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः। तत्राघटमहंजानामीतिप्रत्यये। विशिष्ट
वैशिष्ट्यज्ञानेज्ञानेनसंभवतीति। नचविशेष्येविशेषणमितिरीत्यैवनिर्विकल्पकानुव्यवसायोस्वी
कार्यः। रूपः पटोघटोद्रव्यमितिसमूहालंबनानंतरंरूपंघटंजानामीतिप्रतीत्यापत्तेरविशिष्टवै

५८

शिष्ट्यविषयतायाःशून्यज्ञानानुव्यवसायानभ्युपगमादिति। महत्त्वंबुद्धिरितिचेत्। यद्येवंश्रावणादो
महत्त्वस्यहेतुत्वेयोजनाभावस्तथापिद्रव्यसमवेतप्रत्यक्षत्वादेस्तज्जन्यतावच्छेदकस्यश्रावणादि
साधारण्याश्रावणाद्यन्यत्वनिवेशेगौरवात्प्रयोजनाभावाच्चबुद्धिरितिध्येयं। आत्मा
दिगारणाद्येति। आत्मादयोयेतिव्याप्तिरूपोदोषस्तद्वारणायेत्यर्थः। संततदानेचशब्दादितरद्यङ्कृत
विशेषगुणाःसुखादयस्तद्ग्राह्यत्वंतत्समवेतात्मनिसत्तावान्भातिव्याप्तिरितिभावः। श्रोत्रेसत्यादिति। तथा
चतत्राव्याप्तिरितिभावः। विशेषपदस्यप्रयोजनंवक्तुमिकामाह। उद्भूतत्वमिति। जनकत्वानुपप

त्तेरिति। एकैकस्यकारणतावच्छेदकतेऽप्यविचारात्कूटस्थैकत्वाद्यतिरेकाकारणतानवच्छेदकत्वादितिभावः।तदभावकूटस्यैवकृतत्वमितिं।तथाचतादृशकूटस्यकारणतावच्छेदकत्वमितिनोक्तदोषइतिभावः।इंद्रियाधयवधारणायेति।मनःपदमित्यनेनान्वितं।नयैनमतेमनःपदप्रयोजनमाह।कालादाविति।समवायेनघटाद्यभावादीनांकालेसत्यविनष्टप्रत्यक्षयोग्यानुपलब्धेरभावादतोरूपाभावपर्यंतानुधावनंतद्धारणायेति। कालादेर्धारणायेत्यर्थः।जन्यतेघटितस्यव्यापारत्वस्यात्रसंबंधेसमवायरूपेभावादाह।व्यापारःसन्निकर्षइति।द्रव्यप्रत्यक्षमितिं।द्रव्यत्वनित्यत्वोभयविषयतासंबंधेनप्रत्यक्षमित्यर्थः।द्रव्यसमवेतेति।द्रव्यसमवेतत्वनित्यत्वोभयविषयतासंबंधेनप्रत्यक्षमित्यर्थः।एवमग्रेपीति।द्रव्यसमवेतसमवेतत्वनित्यत्वोभयविषयतासंबंधेनप्रत्यक्षमिंद्रियसंयुक्तसमवेतसमवायजन्यमित्यर्थः।ननुद्रव्यमप्रत्यक्षइंद्रियसन्निकर्षत्वेनहेतुत्वेत्वयाभासयोगाभावेचक्षुषापतिरंधकारेघटचक्षुःसंयोगात्स्यादनापत्तिश्चेत्यतआह।यत्तुतत्रेति।नन्वयमात्मप्रत्यक्षानुरोधेनमनःसंयोगस्यज्ञानादिप्रत्यक्षानुरोधेनमनःसंयुक्तसमवायस्यप्रत्यासत्तित्वेपिचक्षुरादिसंयोगतत्संयुक्तसमवाययोःप्रमाणाभावःचक्षुरादिसंयुक्तसमवेतसमवायस्यैवप्रणुकादेश्चाक्षुषाद्युपपत्तेरतआह।परंत्विति।परंपरया।स्वाश्रयसमवेतत्वादिसंबंधेन।उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्येति।अत्रचक्षुर्घटित

५७ ५७

चक्षुःसन्निकर्षोक्षुद्रत्वादीनांप्रत्यक्षधारणायोद्भूतेति।तथाचमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्यत्रसरेणावभावाच्चाक्षुषाद्युपपत्तिरतःसंयोगस्यप्रत्यासत्तित्वमावश्यकमितिभावः।संयुक्तसमवायेनसंयुक्तसमवायस्यनान्यथासिद्धिरित्याह।द्रव्यसमवेतेति।तादृशेति।महत्त्वावच्छिन्नेत्यर्थः।तथाचमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्यत्रसरेणुरूपेभावात्तत्राक्षुषानुपपत्तासंयुक्तसमवायस्यप्रत्यासत्तित्वमितिभावः।एतत्प्रसंगेनपूर्वरूपावच्छिन्नत्वमग्रेचात्रैकस्मयोगावच्छिन्नत्वंचक्षुःसंयोगतत्प्रयोजकंचाभिहितमितिबोध्यं।स्यान्नेत्यनुमानेतत्कृत्सन्निकर्षस्यकारणत्वंप्रपंचयति।एवमित्यादिना।पूर्वपदेवेति।परमाणुघटितत्वकृत्सन्निकर्षणस्येश्वरस्यानित्यधारणायमहत्त्वावच्छिन्नत्वंभाघटितसन्निकर्षत्वसत्त्वादिस्यानित्यधारणायोद्भूतस्यतदवच्छिन्नत्वादिविशेषणबोध्यमित्यर्थः।त्रोत्रावच्छिन्नेति।सकलपुरुषाणांसर्वज्ञत्वप्रत्यक्षापत्तेरितिः त्रोत्रावच्छिन्नेति।इंद्रियसंबद्धेति।यद्यपिइंद्रियसंयुक्तविशेषणतासंबंधेनेंद्रियसंयुक्तसमवेतविशेषणतासंबंधेनवाहत्त्वमवेतथापिविशेषणतात्वेनैकरूपेणविभागः। नचैवंसमवायत्वेनचतुर्णामनुगमप्रसंगःपरिभाषाप्रयुक्तभेदात्।समवायोनप्रत्यक्षइति। संबंधप्रत्यक्षत्वावदाश्रयप्रत्यक्षत्वेहेतुत्वादितिभावः।ननुविशेषणतयातद्दित्यसंगतंविशेषणतायास्तत्संसर्गाभावात्।नचतत्प्रत्यासत्तेरनभ्युपगमेभावप्रत्यक्षानुपपत्तिरितिवाच्यंविशिष्टापत्तेरनुपलंभस्येव

नस्त्यय स्योपगमान्नच समवायस्य सक्षानुरोधाद्धेषणतास्यासक्तिस्वीकारेऽसमवायानेगीकाराद्तएव
भावस्य सक्षेद्रियेनकरणकिंतुयोग्यानुपलब्धिरेवेतिभट्टानामाक्षेपंदूषयितुमुल्लेखदिस्यादिति।तथा
येद्रियेणाभावप्रत्यक्षजननीयेयोग्यानुपलब्धेःसहकारितामात्रेणानिर्धारेऽतिरिक्तप्रमाणकल्पनम
नुचितमितिभावः।तत्रयोग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वेयुक्तिमाह।तथाहीति।घटादिज्ञाने।घटादिश्च
मे।नचघटस्यमूर्तेनुदोषवत्तस्मतिबंधकः।अन्यथाऽनुमानेऽपिकालेतदभावप्रत्यक्षापत्तिरितिवाच्यं
विनश्यदवस्थाद्रव्यादोषाद्यभ्रमस्तेनभ्रमोऽपिकालेप्रतिबंधकोभूतदोषाभावस्यसत्तादभावप्रत्यक्षाप
त्तेः।अभावोपलंभे।तद्धिंद्रियजन्यतत्संबंधावच्छिन्नतदभावलौकिकप्रत्यक्षेप्रतियोग्युपलंभाभावइति।
तद्धिंद्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलंभाभावइत्यर्थः।इंद्रियांतरजन्येऽनुमानिकेचत
दुपलंभेसत्यपितदभावप्रत्यक्षानद्धिंद्रियजन्येति।अभावप्रत्यक्षहेतुर्यतियोग्यानुपलब्धिरूपस्तस्याभावप्र
त्यक्षादनाहार्यतिचेन्न।प्रतियोग्युपलंभाभावे।अपेक्षितेतिशेषः।तेननजलपरमाण्वादेरदृष्टत्वा
देःप्रत्यक्षमितिभावः।मणिहरन्मतानुसारेणयोग्यतानिर्वक्तुमाहेति।प्रसज्जितः।आपादितः।सउपलं
भाभावोऽभावप्रत्यक्षेहेतुरितिअत्रतदधिकरणविषयकाभावप्रत्यक्षेतदधिकरणकतदापादककाप
तियोग्यतदुपलंभस्यविषयतासंबंधावच्छिन्नप्रतियोगिताकाभावोहेतुरित्यर्थः।उपलंभेतदधिकरणक

तदापत्तियोग्यत्वंचतत्प्रतियोगिसत्ताव्याप्यनिरूपकत्वं।अत्रचतदापादककोटौप्रतियोग्यत्वस्यात्रतद्
भावप्रत्यक्षानुपपत्तिरितियोग्यत्वनिवेशः।नचप्रतियोगिसत्त्वस्योपलंभव्याप्यत्वेननिर्विवादितस्य।उप
लंभसामग्यतरविरहेप्रतियोगिसत्वेप्युपलंभाभावादतः।किंतुमहत्त्वादिविशिष्टपृथिवीत्वस्योपलंभव्याप्यत्वा
त्तादृशपृथिवीत्वाभावप्रत्यक्षापत्तिरितिवाच्यं।तद्
धिकरणाद्यधिकमानवच्छिन्नत्वस्ययोग्यताघटकीभूतव्याप्यज्ञानविरहात्।महत्त्वस्यजलपरमाणवृत्ति
त्वेनतादृशव्याप्तेस्तादृशधर्मानवच्छिन्नत्वाभावादतः।नचगंधवद्द्रव्यसंयोगित्वविशिष्टस्यापिपृथिवीत्वस्य
तदुपलंभव्याप्यत्वात्तादृशधर्मानवच्छिन्नत्वस्यजलपरमाणुवृत्तित्वात्तदादायतादवस्थ्यमितिवाच्यं।योग्यता
घटकव्याप्तेःप्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नत्वस्यापिनिवेशात्।गंधवद्द्रव्यसंयोगित्वादेस्तथात्व
प्रतियोगिग्राहकातिरिक्तत्वेनतादृशधर्मानवच्छिन्नत्वस्योक्तव्याप्यत्वाभावात्।नचप्रतियोगिग्राहकत्वप्रतियो
गिग्रहजनकत्वंतत्रगंधवद्द्रव्यसंयोगित्वस्यनास्तीतिवाच्यं।प्रतियोगिग्रहेकारतानिरूपितलौकिकविशेष्यता
विरहस्यैवप्रतियोगिग्राहकपदार्थत्वात्।अथैवंविशालचक्षुस्संयोगतानिरूपितलौकिकविशेष्यतासिध्यति
त्युक्तिरसिध्यतिचेन्न।न

द्रियसंसर्गाभावप्रत्यक्षेनिरुक्तयोग्यानुपलंभस्यहेतुत्वंभ्रमः। किंतुयोग्यस्याभावप्रत्यक्षेअयोग्यविज्ञानंयो
ग्याभावस्यतदधिकरणप्रत्यक्षेतुतदधिकरणीयत्वंप्रसंजनःप्रसंजितप्रतियोगिकंस्तदधिकरणीप्रसो पल
भस्यविषयतासंबंधावच्छिन्नाभावएवप्रतियोगिनिष्ठाहेतुः। अन्यथापादनस्यसर्वत्रासंभवेनतदधिकर
णप्रसंजनप्रसंजितत्वंतदधिकरणीयत्वनिष्ठव्याप्तिनिरूपितत्वं। जातित्वादिविशिष्टस्यपिज्ञानंघटत्वेत्यस्यो
पलंभव्याप्यत्वात्तत्रभेदेपिज्ञानत्वाभावप्रत्यक्षं। जातित्वविशिष्टस्यपिज्ञानंघटत्वेत्यस्योपलंभाव्याप्यत्वं न
विज्ञानेस्तंभत्वाभावप्रत्यक्षं। एवंतादात्म्येनस्तंभघटत्वेपिज्ञानंघटत्वेत्योर्घपलंभव्याप्यत्वाव्याप्यत्वा
भ्यांस्तंभविज्ञानयोः विज्ञानघटस्तंभभेदयोः प्रत्यक्षाप्रत्यक्षत्वेव्युपपादनीयइति। नचाक्षत्वप्रत्यक्षे
मिति। अनुपलंभेविद्यमानेपिनिरुक्तयोग्यताविशिष्टस्यतस्यतत्राभावादितिभावः। आपादयितुशक्येत्या
दिति। तथाचसमानेद्रियजन्योपलंभव्याप्यत्वस्ययोग्यताबलात्तानन्तर्यचाक्षुषमितिभावः। ननुजाति
त्वादिविशिष्टस्यतेजोद्रव्यत्वेत्यस्योपलंभव्याप्यत्वात्तेजसिगुरुत्वाभावप्रत्यक्षापत्तिरेवस्तंभेपिज्ञानत्वा
भावप्रत्यक्षबलात्तज्ञानाभावस्यापिप्रत्यक्षापत्तिरतआह। गुरुत्वादिकमिति। आदिपदेनविज्ञानादिपरिग्र
हः। अयोग्यस्यविज्ञानत्वादिजातेरभावस्यप्रत्यक्षत्वानुरुत्वादिकमित्यर्थः। नयोग्यः। नप्रत्यक्षविषयः।
अज्ञेयत्वादिति। निरुक्तयोग्यताघटकत्वाभावेतियोग्यघटितधर्मनिरवच्छिन्नत्वस्यनिषेधशास्त्रेहृते च

BHANDARKAR ORIENTAL RESEARCH INSTITUTE

जातित्वविशिष्टतेजोद्रव्यत्वेत्यस्योपलंभव्याप्यत्वेविजातित्वस्यगुरुत्वाद्यत्वेनतादृशव्याप्यत्वेप्रतियोग्यघ
टितधर्मनिरवच्छिन्नत्वाभावादितिभावः। नचतदधिकरणीयत्वप्रसंजनेनप्रसंजितप्रतियोगिकंस्तदधिकरणी
यत्वोपलंभस्याभावएवेद्रियघटाभावादिप्रत्यक्षेहेतुरास्तांकिमूर्धक्तयोग्यानुपलंभहेतुतयेतिवाच्यं।
तथासतिपरमाण्वादौमहत्त्वाद्यभावप्रत्यक्षानुपपत्तेरिति। यावद्रूतरूपाभावइति। रूपत्वावच्छिन्ना
भावस्यतीद्रियानुद्भूतरूपप्रतियोगिकत्वेनप्रत्यक्षसंभवाद्रूद्भूतेति। एवमादयद्रव्यादिनाप्रभाव्याद्भूत
स्यग्राह्याभावपरिग्रहः। प्रत्यक्षेविषयतेनकारणत्वेनकारणत्वस्यकूटत्वात्तेनैवगुरुत्वाद्यतीद्रियाभावप्रत्ये
क्षंवारणेतदनुरोधेनतदधिकरणीयत्वेसाद्विद्वीतीयोग्यानुपलंभेस्यहेतुतानिरुक्तौकार्यसिद्धायथा
नूसंसर्गाभावेयोग्यतामाह। संसर्गेतिप्रतियोगिनोयोग्यतेतियोग्यमात्रेप्रतियोगिकत्वेसतियोग्यध
र्ममात्रावच्छिन्नप्रतियोगितोक्तत्वमित्यर्थः। अत्रद्रव्यसामान्याभावधारणायमात्रेति। गुरुत्वंद्रव्यत्वं
भावधारणायविशेष्यदलं। रूपगुरुत्वोन्यतरावच्छिन्नाभावधारणायविशेष्यदलेमात्रेति। अधिकरणयो
ग्यत्वमिति। योग्याधिकरणत्वंतस्मिन्नित्यर्थः। इदंचाभावग्राहकयोग्यसन्निकर्षमदूषणार्थं। तेनस्तंभइद
वाच्यादौनविज्ञानान्योन्याभावप्रत्यक्षमितिभावः। अन्योन्याभावयोग्यतात्रजात्यवच्छिन्नप्रतियोगिता
कत्वंजात्यतिरिक्तयोग्यधर्मानवच्छिन्नप्रतियोगितात्वान्यतरत्वं। तेनस्तंभेविज्ञानान्योन्याभावविज्ञानवद

न्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिरिति न्यत्र विस्तरः। धूमत्वादि सामान्यलक्षणाया इंद्रियजन्यज्ञाना
धाद्याप्रारब्धकथनमसंगतमतआह। व्यापारः सन्निकर्ष इति। येन धूमत्वादेरिंद्रियप्रतियोगिकत्वाभावात्स
न्निकर्षत्वमयुक्तंतथापि संयोगस्येंद्रियप्रतियोगिकत्वाद्घटितस्येंद्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूत धू
मत्वादेः प्रत्यासत्तित्वनिर्वाहः। तथा। सामान्यस्य चैवं। अत्रयदीति। इंद्रियसंबद्धसामान्यमत्यासत्तिरित्यं
शतेतदेत्यर्थः। ननुपत्रचक्षुःसन्निकर्षेणधूमज्ञानजनितंतत्रचक्षुःसंयोगविगमेविनाद्रव्यज्ञानमादो
येंद्रियसंबद्धविशेष्यकज्ञानप्रकारस्यधूमत्वादेर्धूमांतरसत्ताद्धूमांतराणांसामान्यलक्षणयाज्ञानापत्तिः। न
चतदाधूमोनेंद्रियसंबद्धः ज्ञानलक्षणासन्निकर्षस्यधूमेसत्वात्। नचतत्रैकक्षणेसामान्यलक्षणाज
न्यज्ञानस्यीकारेक्षतिरिहदुर्वारेतिवाच्यं। तन्मूलकज्ञानधारापन्नेदुर्वारत्वादित्यतआह। लौकिकोग्रंथइ
ति। अत्रलौकिकसन्निकर्षस्यविशेषणविधयाघटकत्वंबोध्यं। अन्यथातत्रधूमेपूर्वकालीनचक्षुःसंयो
गमादायतद्दोषतादवस्थ्यमितिध्येयं। इदमुपलक्षणं। यत्रचक्षुःसंयोगेविद्यमानेदोषान्नधूमचाक्षु
षंकिंतुधूमत्वप्रकारकस्मरणंतत्रधूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणायसामान्यलक्षणाघटक
ज्ञानेतदिंद्रियजन्यत्वस्यवाच्यत्वात्। नत्विंद्रियसंबद्धत्वंतत्रलौकिकसंबद्धः। ज्ञानप्रकारीभूतधूमत्वस्यतदि
द्रियजन्यत्वंचेद्विवक्षितंतदाणुत्वेनयत्किंचिदणूपस्थितावणुत्वसामान्यलक्षणयास्फोटेणुगोचरोमान
सबोधोनस्यात्तदाणोर्मनसोलौकिकसंबंधस्यज्ञा

नेमनोजन्यत्वस्यचाभावादतआह। इदंचेति। तथाचबहिरिंद्रियेणसामान्यलक्षणयाज्ञानेजननीयेतद्विवक्षितं
नतुमानसंसामान्यलक्षणाजन्येज्ञानेइतिनोक्तदोषइतिभावः। आसत्तिराश्रयाणांत्वादिमूलमयतोरचितं
भूमिकारंभयतिं। परंत्वित्यादिना। भूततलेइत्यस्यजातइत्यनेनान्वयः। भूततलादौनामित्यादिनासंयोगेनत
द्घटाधिकरणद्रव्यांतरपरिग्रहः। तत्रेदंबोध्यमिति। ज्ञायमानमित्यंसामान्यंतत्रप्रत्यासत्तिरितिबोध्यमि
त्यर्थः। परंपरयाप्रत्यासन्नस्यघटत्वादेरेवप्रत्यासत्तित्वंसंपद्यतइत्यादिनाग्रंथेनदृश्यमाणदोषासंगतेः
राह। परंत्विति। तथाचघटत्वस्यपरंपरयाकपालादावज्ञानाद्दृश्यमाणदोषसंगतिः। तेनसंबंधेनेति। अ
न्यथासमवायेनज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्याकपालादिज्ञानापत्तेरितिभावः। किंत्विति। एवं
चेत्यर्थः। किंचेति। कुतोनजन्यतइति। इदमापाततः। सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्यविशे
षणत्वंविवक्षणेनकालांतरीयसंयोगमादायोक्तातिप्रसंगस्याभावादिति। तस्मात्सर्वोक्तदोषएवात्रकल्पेबो
ध्यः। नचतत्रस्वसमवायिसमवायादिसंबंधेनघटत्वादेरासत्तितयापूर्वोक्तदोषोविनसंभवतीतिवा
च्यं। स्वसमवायिसमवायादिनाघटत्वंकपालादौयदाज्ञातंतत्किंतुतघटएवस्वसमवायादिनाज्ञातस्तदुत्तर
मपितद्घटाश्रयकपालादौज्ञानेज्ञानस्यस्वसमवेतघटत्वप्रत्यासत्त्याजनकत्वानुभवसिद्धस्यघटत्वप्रत्यासत्त्याजन
कत्वानुपपादनासंभवात्। एवंज्ञा
यमानसामान्यस्यप्रत्यासत्तित्वेचेंद्रियज्ञानविषयसामान्यप्रत्यासत्त्यामेत्रस्यतदाश्रयप्रत्यक्षापे
क्षियातत्स्मृतौयत्नेविशेषाभावइयंकृतयागौरवं। ज्ञानस्यमेत्यासत्तित्वेतुचुरूबनिष्ठप्रत्यासत्त्या

हेतुत्वान्नत्तपुरुषाभ्यनिषेधेऽपि इदमित्यधीध्यं तेनसामान्यविषयकंज्ञानमिति इंद्रियसंबद्धविशे
ष्यकंसामान्यप्रकारकंज्ञानमित्यर्थः। यद्वा। सामान्यविषयकंज्ञानमात्रमित्यर्थः। सामान्यविषयकज्ञानत्वे
प्रत्यासत्तिताद्यछेदकमितिमाधवः। तथाचात्रकत्वेइंद्रियसंबद्धविशेष्यकत्वप्रकारत्वतदिंद्रियजन्यत्वा
नि ज्ञानविशेषणानिनोपादेयानीति। पूर्वमतेतुतदिंद्रियजन्यत्वादेर्निषेधेनेंद्रियघटेदेशकार्यकारण
भावकल्पनेनचगौरयमितिभावः। एतन्मतेचनिर्विकल्पसाधारणंस्मरणसाधारणंचसामान्यज्ञानमात्रप्र
त्यासत्तिस्तथाचघटत्वप्रकारकमत्यक्षत्वंकार्यतावच्छेदकंघटत्वज्ञानत्वंचकारणतावच्छेदकंस्वप्रकारी भूत
घटत्वाश्रयसंकार्यतावच्छेदकःसंबंधः। स्वविषयघटत्वाश्रयत्वंचकारणतावच्छेदकःसंबंधः। चक्षुःसंयोगा
दिशून्यकालेपूर्वोक्तातिप्रसंगस्यवक्ष्यमाणतादिंद्रियजेत्यादिनेश्वरज्ञानादिनिषेधेयं। अणुत्वज्ञानमात्रेणचस
कलाणुगोचरमानसबोधोदयादाह। बहिरिति। आलोकसंयोगादिकमित्यादिनादोषाभावपरिग्रहः। नजन्य
तइति। अयमाशयः। यदाघटचक्षुःसन्निकर्षादिघटितंचाक्षुषादिसामग्रीतदुत्तरक्षणेघटइतिचाक्षुषंसे ९१
यसामान्यलक्षणातयोत्तरक्षणेसकलघटविषयकज्ञानंजन्यतइतिप्राचीनमतेक्षणैकशिलुःकल्प्यते। ९१
तत्रचमानाभावः। यदेवघटइतिचाक्षुषमुत्पद्यतेतदेवसन्निहितघटाद्देशिकमन्यघटाद्वा। लौकिकमि
त्यभ्युपगमेतथाचसामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषस्यव्यापकघटत्वप्रकारकत्वंलौकिकचा
क्षुषमितिफलितं। तथाचचक्षुःसन्निकर्षादिशून्यकालेव्यापकधर्मावच्छिन्नजनकसामग्र्याःसह

कारिण्याविरहादेवनचाक्षुषंसामान्यलक्षणयाज्ञानमिति। यदिज्ञानरूपेति। अत्रसोयदिशब्दः सामान्यलक्षणा
पीत्यनुषंगेणोज्यः। सामान्यलक्षणास्वीकारेबीजमाह। अत्रेति। अयमर्थः। अयमग्निरित्यादौ। भानं। विषयता। नसंभ
वतीति। प्रत्यक्षविषयतायाः सन्निकर्षजन्यत्वव्याप्यत्वादिति भावः। वह्निसंबंधस्यग्रहीतत्वादिति। तथाचप्रत्य
क्षधूमेव्याप्तेर्निर्णीतत्वान्नतद्विशेष्यकोव्याप्यत्वसंशयःसंभवतीतिभावः। अनुपस्थितेत्यादि। तथाचधर्मि
ज्ञानाभावान्नतद्विशेष्यकोव्याप्यत्वसंशयःसंभवतीतिभावः। ज्ञानलक्षणास्वीकारेबीजमाह। एवमित्यादिना।
कथंस्यादिति। चंदनरवेरस्यचाक्षुषंजायमानेउपस्थितसौरभभानेनस्यात्सौरभांशेचक्षुःसन्निकर्षाभा
वादित्यर्थः। सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याःसहकारिण्याविरहेणसौरभत्वसामान्यलक्षणयावि
शेषभानेनसंभवतीतिभावः। स्वरूपेचंदनमित्यादौसौरभादेर्भानंसौरभत्वादिसामान्यलक्षणयेतिसंभवति
सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणतत्स्याःफलज
नकत्वांगीकारात्। प्रहरत्वेचद्वितीयसामग्र्याःसहकारिण्याःसत्वादित्यभिप्रायेणाह। यद्यपीति। सौरभत्वस्यभान
मिति। स्वरूपतःसौरभत्वस्यभानमित्यर्थः। ज्ञानलक्षणया। ज्ञानलक्षणयैव। तदानीं सौरभत्वांशेधर्मितारस्वा
ग्रहीतत्वेनतयासामान्यलक्षणयातद्भानानिर्वाहादितिभावः। ननुधर्मितारूपसौरभत्वांशेग्रहेदिसौरभत्वसामा
न्यलक्षणयैवसौरभत्वादेर्भानमस्तु। सौरभत्वप्रकारकसौरभादिशब्दकरस्थेवतत्काम्यतावच्छेदकत्वादितिचेन्न।
सौरभत्वादिविषयतानिरूपितकामाः स्युर्विषयसौरभत्वादिमत्त्वरूपसामान्यलक्षणायाः संबंधस्यसौरभत्वे

भावेन सामान्यलक्षणयात्मज्ञानानिर्वाहात्। सौरभस्य सामान्यलक्षणायाः कार्यतावच्छेदके सौसौरभत्वप्रकारकत्वनि
वेशेप्रयोजनाभावाच्च। न च ज्ञानलक्षणायाः कारणांतरत्वकल्पनेगौरवमिति वेसामान्यप्रकारकत्वस्य कार्यतावच्छे
दकेप्रवेशइति वाच्यं। विशेषणज्ञानहेतुतयैवनिर्वाहे ज्ञानलक्षणायाः करणांतरकल्पनाधिरहादिति। ननुविशे
षणज्ञानजन्यतावच्छेदकविशिष्टबुद्धित्वं ज्ञानलक्षणायास्तत्विशिष्टमत्यक्षत्वमितिन कूतेननिर्वाहः। एवंयत्र ज्ञा
नलक्षणयास्यधिषयमुख्यविशेष्यकं मांसंतत्रविशेषणज्ञानकरणत्वानिर्वाहइत्यतआह। एवमिति। ज्ञानल
क्षणया। ज्ञानलक्षणयेत्यर्थः। नन्वधूमसंज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयसंबंधेनधूलीपटले
अभावेनसामान्यलक्षणया; नुमेयसाध्यधूलीपटलभानासंभवादितिभावः। सर्वदेवेति। ध्यानाद्यभावेपीत्यर्थः।

६२

६२

॥श्रीगणेशायनमः॥अनुमितिमिति। संगतिश्चात्रात्यक्षेणोपजीव्योपजीवकभावोबोध्यः। करणमिदृष्टिरव्य
ापारेजिज्ञासोदयान्मूलेपक्षान्निर्दिष्टमपिकरणंप्रथमंदर्शयति। व्याप्तिज्ञानमिति। परामर्शोव्यापारइ
ति। ननुव्यापारवंतंप्रत्येसतितत्प्रत्यजनकत्वंतत्रैवपरामर्शेसंभवति। यन्हिव्याप्यधूमवान्पर्वतइति
परामर्शेव्याप्तिज्ञानजन्यत्वंस्माकंधान्महानसीयधन्हिधूमव्याप्तिज्ञानस्यतदानीमभावेनपक्षिणाराद्यतस्तदु
पपादयति। तथाहीत्यादिना। पश्यतीति। धूमदर्शनस्यव्याप्तिस्मरणेद्वोधकविधयाहेतोः संपत्स्यर्थः। आहचाहि
शेषणविशिष्टस्यधूमस्यव्याप्तिसंबंधितयाज्ञानंताहशधूमदर्शनस्येवव्याप्तिस्मृताबुद्धोधकत्वमित्यस्मि
न्नेषणानवच्छिन्नत्वमुक्तं। एवंरूपंस्मरणमिति। उद्बुद्धसंस्कारस्यपूर्वंसत्वादितिभावः। सएवपरामर्शइति।
तथाचस्मरणात्मकव्याप्तिज्ञानस्यपूर्वंसत्वान्नव्यभिचारइतिभावः। नचतथापिपक्षव्याप्तिघटकपदार्थानां
विस्मरणलोपस्थितिमूलोहि शेषणमितिरीत्यापरामर्शस्तत्रविशिष्टव्याप्तिज्ञानस्यव्यभिचारोदुर्वार
एवेतिवाच्यं। व्याप्यधूमनिष्ठविषयत्वाभिन्नेशमयुक्तत्वाद्यनविशिष्टस्यवेशिष्ट्यमितिरीत्यापरामर्शस्ये
त्यनुमितिहेतुत्वादित्यर्थात्। स्मरणात्मकपरामर्शव्याप्तिज्ञानस्यव्यभिचारवारणेन। संस्कारसंबंधे
नपर्वतव्याप्तिज्ञानस्यसत्वात्। अत्रनव्याः। व्याप्तिज्ञानस्यपरामर्शस्यव्यापकतया; नुमितिप्रतिहेतुत्व
मेवनास्तिकुतः करणत्वंअन्यथाकपालादेर्घटप्रतिद्वयत्वेनहेतुतापत्तिस्तस्मादनुमितिप्रतिमनस्त्वेनैव

त्यदि ११

करणस्य माहुः। लिंगकमनुमितिकरणमिति। अनुमितौ परामर्शमात्रंनहेतुरपितुलिंगपरामर्शः। तथाचधि
ङ्निष्टस्यकारणतायहेर्विशेषणस्यविकारणतायहात्परामृश्यमाणलिंगस्यलिंगपरामर्शस्यैवहेतुत्वेन्या
ङ्निगमनाधिरहादुभयोर्हेतुतासिद्धौतत्रव्यापाराभावान्न परामर्शस्यकारणतालिंगस्यैवेत्याशयः।
लिंगस्यतदानीमभावादिति। नचपरामर्शरूपव्यापारसंबंधेनतदानीं लिंगमस्तीति वाच्यं। अतीतादिलिंग
स्यपरामर्शेनजन्यतयाव्यापारत्वासंभवात्। इदमुपलक्षणं। लिंगस्यहेतुत्वेचैत्रीयपरामर्शेवि
षयीकृतलिंगान्मैत्रस्यानुमितिप्रसंगः। तन्तुत्वावच्छिन्नंप्रतिवेशोगोरयं। अस्मन्मतेतुसामानाधिकरण्यमत्यासत्या
हेतुहेतुमद्भावेनैवातिप्रसंगाभावान्नतत्पुरुषीयतत्तद्वेशज्ञानमितिलाघवादिहापिबोध्यं। नच। व्याप्यस्यप
क्षेणसहैवैशिष्ट्यावगाहिज्ञानंच। ननुपरस्परव्यभिचारइत्यतआह। अनुमितिस्थिति। कार्यतावच्छेदकस्यप
रस्परानुमितिव्याप्यत्वेनान्योन्यव्यभिचारइतिभावः। पक्षधर्मशब्दोत्रसमेयसर्वानुमितौनियतमितिनधीनमतमा
ह। द्विविधादपीति। कारणतावच्छेदकंचपरामर्शद्वयसाधारणंव्याप्यपक्षोभयधर्मविशिष्टावगाहिनिश्चयत्वं। अ
तोनव्यभिचारः। द्विविधयोरपिपरामर्शयोस्वस्वव्यधिकरणानुमितिप्रतिबंधेनहेतुत्वमित्यधिकेचित्।
यस्तुतेनुभयानुरोधात्पक्षविशेष्यकपरामर्शस्यैवहेतुत्वं। अतएवधूमवन्निष्ठाव्याप्यधूमवांश्चायमित्याकारकः
पक्षधर्मविशेषकएवोपनयः सर्वसंमतइतिध्येयं। मीमांसकस्तुनेति। ज्ञानविशेषोत्रस्यानुमितेर्हेतुर्नादित्य

६३

६३

नेनान्वयः। ज्ञानद्वयादेव। ज्ञानद्वयादपि। विशिष्टवैशिष्ट्यावगाहिज्ञानमितिभावःप्रथानोनिर्देशः। सर्वत्रकारणमिति।
अनुमितित्वावच्छिन्नंप्रतिनकारणतावच्छेदकमित्यर्थः। आद्यरूपकथादिति। व्याप्यतावच्छेदकप्रकारकपक्षधर्म
ताज्ञानस्यैवाभ्युपगमात्सिद्धान्तियतपूर्ववह्निमानवच्छेदकताकत्वादित्यर्थः। ननुज्ञानद्वयस्यैवविशिष्टज्ञानेक
रणेमानेतेनव्यभिचारइत्यतआह। विशिष्टज्ञानेति। व्याप्यतावच्छेदकेति। अयमात्मेत्यादौधूमोयंतिसंदेहदशा
यांव्याप्यतावच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः। यन्निष्ठाव्याप्यत्वनितीति। यन्निरूपितव्याप्यत्वमित्यर्थः। न
नुधूमसमानाधिकरणेत्यादिरूपव्याप्तिविशिष्टधीरित्यर्थः। तत्रहेतुतावच्छेदकंभाननेष्यतइत्यतआह। अनुमिमस
तेतिति। तथाचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यतत्रव्यभिचारान्नतेनरूपेणहेतुत्वमितिभावः।
ननुतत्रकेवलाव्याप्यतावच्छेदकप्रकारकज्ञानकरणमनीयमतोनव्यभिचारइत्यतआह। नाघवादितिव्या
प्यतावच्छेदकप्रकारकत्वापेक्षयाव्याप्तिप्रकारकत्वस्यलघुत्वादित्यर्थः। नन्वेवंतावच्छेदकलाघवंतथापिपू
र्वोक्तकरणमनाघयन्मैथिलीमीमांसकानामूलमुच्छिद्यतेतत्यतआह। किंचेति। नचगुरुमाणेति। अत्रज्ञानशो
ग्रहस्थलेमानतायाअभिधानान्नकारणतेतियताद्दग्ग्रहमादायदोषः। व्याप्तिप्रकारकंज्ञानमिति। स्यन
यंकारणमित्यनेनान्वयः। इत्युच्यतइति। इत्युक्तंतत्पुरुषीयंतत्तन्निरूपकत्वंचैत्रस्यव्याप्तिग्रहकालेतद्भिन्न
मैत्रस्यानुमित्यापत्तेरभावान्मैत्रात्मनिस्थितंहेतुभूतंतथाप्तिज्ञानमाधादितिनगोरयमितिभावः। ननुव्या
प्तिप्रकारकपक्षधर्मताज्ञानत्वेनपक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेनवाहेतुत्वेत्यत्रनिगमना

विरहेण हेतुतावच्छेदकतया धीरित्यत आह। वह्निव्याप्यइति। अनुमितिः स्यादित्यन्तम्। न्यायनयेतु व्याप्तिप्रकारतानिरूपित
तहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञानत्वेनहेतुत्वस्यविवक्षितत्वान्नतादृशज्ञानत्वाद्धूमोवह्निव्या
प्यो धूमवान्पर्वतइतिज्ञानादनुमितिरापद्यते तत्र व्याप्तिप्रकारतानिरूपितधूमप्रकारतायाः पर्वतविशेष्यता
निरूपितप्रकारतात्मकत्वादितिभावः। ननु ज्ञानद्वयस्यैकविशिष्टज्ञानैकत्वमनागौरवंन्याय्यमतेदूषण
मविष्यतीत्यत आह। दूरत्वेति। फलमुखगौरवस्येति। फलं। कार्यं कारणाभावग्रहः। तन्मुखं। तदधीनं।
गौरवं। गौरवज्ञानमित्यर्थः। विशिष्टज्ञानत्वावच्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मैक्यगौरवनिश्च
योविरोधीत्यर्थः। तत्र गौरवंप्रमाणान्तरासिद्धंतत्तदनुमितिव्यवहितपूर्वधर्मिस्वाश्रयैकत्वमेवतादृशगौरव
निश्चयोविशिष्टज्ञानत्वैक्यकारणत्वनिश्चयाधीनस्तूघटकीभूततत्तदनुमितिव्यवहितपूर्वधर्मिस्वाश्रयनि
र्णयंविनानसंभवतीतिकार्यकारणभावनिर्णयात्पूर्वं गौरवनिर्णयाभावान्नतादृशगौरवदोषइतिभावः।

मूलेपरामर्शनिरूपणानन्तरंव्याप्तिनिरूपणेसंगतिमुपोद्घातंदर्शयति। व्याप्तेरिति। तत्रेति। घटकत्वंसम्बन्धः। अव्याप्ति
प्रसंगादिति। अव्याप्त्यभिधानमिदमेवंविधसंबंधेनसाध्यवत्त्वविवक्षणात्प्रायेणवा। यद्यपिसंबंधसामान्येन
साध्यवत्त्वविवक्ष्यतेतदाधूमवान्यत्रेत्यादावतिव्याप्तिर्बोध्या। अत्रेतिसंनास्तीति। विशिष्टार्थेमत्वर्थाः। नि
रूपकत्वादितिभावः। फलितार्थइति। तथाचतन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैवतन्निरूपिताधेय

तावच्छेदकसंसर्गेणविशिष्टसत्तात्यन्ताभावस्यगुणाधेयतानवच्छेदकत्वान्नाव्याप्तिरितिभावः। अथवेत्यादिलक्षणमथ
तारयितुमत्रलक्षणदोषमाह। नन्विति। ननुकेवलान्वयित्वज्ञानंकालेपक्षतायांघटकसंशयाभावान्नेदानुमितिः त
धून्यकालेतुपक्षतायांघटकव्याप्तिज्ञानादनुमितिर्भवत्येवेत्यत आह। किंचेति। इत्यादित्यादिनासंयोगेनहेतुता
यांगुणवानयंघटादित्यादेः संग्रहः। ननुस्वाधिकरणावृत्तिसाध्येयदन्योन्याभावकूटंलक्षणार्थंस्वधर्मेण य
मयाप्तिरितिचेन्न। वह्निमान्धूमादित्यादौधूमाधिकरणवह्निमदन्योन्याभावस्यकालिकसंबंधेनवृत्तेर
व्याप्त्यापत्तेः साध्यसत्ताग्रहविरोधितानियामकसंबंधेनावृत्तित्वस्यावक्ष्यविवक्षणात्। यत्रासत्ताभावस्यानू
नभावादित्यादावव्याप्तेः। जीवत्वाभावाधिकरणेसाध्यसत्ताग्रहविरोधितानियामकसमवायेनवृत्तेरभिधेः।
नचसत्ताबाधजातेरित्यादौस्वाधिकरणत्वादिव्याप्तिज्ञानंकारणं। सत्ताभावस्यानूनत्वाभावादित्यादौतुसाध्य
यदन्येत्यादिव्याप्तिज्ञानंकारणमितिवाच्यं। तथापिसंयोगसंबंधावच्छिन्नघटाभावेसाध्येविवक्षितयाहेतौघ
टैकक्षणेहृदस्याप्यव्याप्तेः। तत्रविवक्षितयाहेत्वधिकरणेज्ञानेसाध्यसत्ताग्रहविरोधितानियामकसंयोगेनत
थाप्रतसंयोगेनघटाधिकरणहेतुतावच्छेदकविवक्षितयावच्छेदकस्यैवतादृशाभावेमानाभावइत्यत
आह। एकसत्त्वेपीति। इदमुपलक्षणं। विशिष्टाभावमादायाव्याप्तिरित्यपिबोध्यं। ननुवैशिष्टयंव्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणान्नाव्याप्तिरित्यतआह। गुणवानिति। अन्यतरत्वंचैकत्वसंख्याक्रांत
यासमानाधिकरणयोरेवव्याप्तिरित्यर्थविवक्षणान्नातिव्याप्तिरितिभावः। एतदुपपादनेतदादिस्वादेर्लक्षणसंग्रह

९४

संभवासंभवादाहार्याप्तीति। इतिचाग्रमिति। गुणत्वस्यद्रव्यत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वान्ना
प्राप्तिरितिभावः। परंपरया। स्वाश्रयसमवायेन। तथाचोक्तपरंपरायादवच्छेदकंतदन्यत्वस्यजातित्वेसत्यान्याप्ता
प्तिरितिभावः। तादृशधर्मावच्छिन्नाभावः। उक्तपरंपरयारूपत्वाप्यजातित्वावच्छिन्नस्यसमवायेनाभावः। नन्वा
त्मत्वादिष्वित्यनुषज्यते। मतांतरमाह। साध्यादीति। आदिनासाधनपरिग्रहः। व्याप्तेर्भेदादिति। प्राप्ति
ज्ञानस्यकारणताभेदादित्यर्थः। पूर्वोक्तरीत्यानिर्वाहेतत्रसाध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेद
कतानवच्छेदकत्वप्रकारकज्ञानस्यहेतुत्वंबोधितं। कारणतावच्छेदकगौरवात्। नचपूर्वोक्तरीतौजातिमान्नित्यो
नुमितिः स्यान्नदुजातिमत्त्वान्नित्याकारिकेतिवाच्यं। घटत्वादिहेतुकेजातिमान्नित्येयानुमित्याकारःजाति
मत्त्वान्नित्याकारस्तत्तद्व्यक्तिहेत्यहेतुकइत्यादावादित्यविवदंतिभ्यामस्वरसः सूचितः। शुद्धसत्तासामा
धिकरण्येति। नचविशिष्टनिरूपिताधिकरणतायाःहेतुतावच्छेदकसंबंधत्वेकथंतेनसंबंधेनसत्ताधिकरणगुण
समवायस्यतथात्वेतुद्रव्यत्वेसाध्येविशिष्टसत्तायाव्यभिचारित्वान्नाव्याप्त्यभिधानमसंगतमितिवाच्यं। साध्या
भावयद्वृत्तितावच्छेदकहेतुतावच्छेदकयत्स्वेवव्यभिचारपदार्थतयाशुद्धसमवायस्यहेतुतावच्छेदकसंब
न्धेविशिष्टसत्त्वस्यहेतोर्व्यभिचारित्वाभावात्। साध्याद्वृत्तीति। नचहेतुतावच्छेदकविशिष्टसत्तायविशिष्ट
सत्ताया अधिकरणत्वस्यगुणेसत्वादेर्घटादिरूपेवैयधिक्यमप्राप्तिपरिहारइतिवाच्यं। हेतुतावच्छेदकावच्छिन्न
निरूपिताधिकरणत्वस्यविवक्षितत्वाद्विशिष्टसत्तात्वस्यगुणनिष्ठाधिकरणतानवच्छेदकतयातदवच्छिन्न

निरूपिताधिकरणत्वस्यगुणेऽभावादिति। तथैव। तदवच्छेदेनैव। तस्यैवयत्किंचिदित्। अधिकरणभेदेनाभावभेदान्नप्यु
पगमादितिभावः। प्रतियोग्यधिकरणत्वंप्रतियोग्यधिकरणत्वविभिन्नत्वं। विवक्षितत्वादिति। प्रतियोग्यधिक
रणपदेनविवक्षितत्वादित्यर्थः। नन्वेवंहेतुसमानाधिकरणत्वस्यैव्यर्थ्यं। सत्ताधानुगतेरित्यादौसत्ताद्यभाव
स्यनिरुक्तप्रतियोग्यधिकरण्याभावादव्याप्तिरितिहादतआह। स्वप्रतियोग्यनधिकरणेति। निष्कर्षइति।
प्रतियोग्यधिकरणहेतुसमानाधिकरणाभावांतंनिष्कर्षइत्यर्थः। तथाचहेतुसमानाधिकरणत्वविशेषणवैयर्थ्या
दतादृशप्रतियोगिव्यधिकरण्यंनाभान्नतद्व्यर्थमितिभावः। सत्ताधिकरणत्वेचीति। तथाचविशिष्टसत्ता
भावेनप्रतियोगिव्यधिकरणः। अभावांतरप्रतियोगितायाश्चानवच्छेदकत्वंविशिष्टसत्वमित्यतिव्याप्ति
रितिभावः। नक्षतिः। नाव्याप्तिः। एवमग्रेपि। ननुप्रतियोगितावच्छेदकसंबंधेनैवप्रतियोग्यनधिकरणत्वमु
च्यतांतावतापिनावान्तरसत्तादिव्यावर्तनेतिमंसगादित्यत आह। इत्थंचेति। साध्यतावच्छेदकसंबंधेनप्रतियोग्य
नधिकरणत्वविवक्षणेत्यर्थः। यन्हिदेरहस्येपीति। तथाचप्रतियोगितावच्छेदकसमवायेनप्रतियोगिव्यधि
करणतादृशाभावप्रतियोगितावच्छेदकत्वाद्द्रव्यत्वस्याव्याप्तिः। साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाग्रिमप्रति
योगितानिरूपणेतुसंबंधद्वयमवश्यंदेयमेवेतिभावः। नक्षतिः। नाव्याप्तिः। समवायेनद्रव्यभावस्य साध्य
तावच्छेदकसंयोगेनप्रतियोग्यधिकरणहेत्यधिकरणदृत्तिसत्ताभावादितिभावः। तत्सामान्यस्य। प्रतियोगि
तावच्छेदकावच्छिन्नसामान्यस्य। यत्किंचिदिति। यत्किंचिद्घटप्रतियोगितावच्छेदकंतदवच्छिन्नसामान्यस्यवेत्यर्थः।
पूर्वक्षणवृत्तित्वविशिष्टेति। पूर्वक्षणवृत्तित्वविशिष्टस्यतत्स्यघटाभावादेर्योऽभावस्तदात्मकेत्यर्थः। घटाभा

यद्घटाधिकरणेपि पूर्वक्षणदृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरक्षणावच्छेदेनसत्वादितिभावः। नचपूर्वक्षणदृत्तित्वविशिष्टस्यघटाभावादेर्भावः स्वाभावस्यप्रतियोगी नघटाभावादेरिति वाच्यं। पूर्वक्षणदृत्तित्वविशिष्टस्यघटाभावादेर्योभावस्तदभावस्यपूर्वक्षणदृत्तित्वविशिष्टघटाभावरूपस्यघटाभावानतिरिक्तत्वादितिशिष्टघटाभावप्रतियोगिनस्तस्यमुद्गरघटाभावप्रतियोगित्वात्। तथाचप्रतियोगित्वाधिकरणाभावाप्रसिद्धा। संभवतीतिभावः। घटाभावात्मकतयेति। अभावाधिकरणकाभावस्याधिकरणानतिरिक्तत्वादितिभावः। इत्यादावित्यादिना। भावसाध्यकस्थलेतुमात्रपरिग्रहः। स्वरूपसंबंधइति। अभावीयविशेषणतेत्यर्थः। पूर्वक्षणदृत्तित्वविशिष्टस्याभावेति। पूर्वक्षणदृत्तित्वविशिष्टंयत्तद्घटाभावादितदभावात्मकत्वमित्यर्थः। प्राचांमतेदृश्ये संयोगसामान्याभावानंगीकारादाह। कपीति। घटाभावीयमयत्किंचित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नाधिकरणत्वंहेत्वधिकरणसंभवान्नप्रतियोग्यधिकरणाभावाप्रसिद्धिर्निबंधनाव्याप्तिः संभवतीतिभावः। घटत्वहेतुकमयत्किंचित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नाधिकरणत्वंहेत्वधिकरणघटादेर्नसंभवतीति। द्रव्यसिद्धांते घटेगुणसामान्याभावसत्वादतआत्मपर्यंतानुधावनं। तर्कीयदिदृष्टानुसारेणसमाधत्ते। यादृशीति। यादृश्याःप्रतियोगितायाःअवच्छेदकावच्छिन्नाधिकरणत्वहेतुमत्तत्तादृश्याःप्रतियोगितायाअनाम्न्यर्थमित्यर्थः। विवक्षितत्वात्। अप्रतियोगिपदमविवक्षितत्वात्। कपिसंयोगाभावव्यावर्तनायादिपदंगुणसामान्याभावस्यावच्छिन्नप्रतियोगितायाएवव्याप्यतामितियोगितापदेनोपादातुंशक्यत्वात्तदनवच्छेदकत्वस्यकपिसंयो

गाभावत्वेसत्याव्याप्तिरितिभावः। अत्रचयद्धर्मावच्छिन्नाधिकरणत्वंहेत्वधिकरण्यंतद्धर्मावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्थलएवार्थिकदुष्टस्यसंभवेपियथासन्निवेशेनवेत्यर्थमितिबोध्यं। साध्यतावच्छेदकसंबंधेनप्रतियोग्यनधिकरणत्वविशेषणंव्याप्तिशंकते। नन्विति। महाकालभेदविशिष्टघटाभावइति। अभावीयकालिकविशेषणतासामानाधिकरण्यसंबंधेनमहाकालभेदविशिष्टस्यघटस्याभावइत्यर्थः। महाकालभेदाभावादिति। अभावीयविशेषणतासंबंधेनमहाकालभेदाभावादित्यर्थः। सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभ्यांयत्रविशेषणविशेष्योभयत्रनत्रैवविशिष्टाधिकरणत्वोपगमादितिभावः। ननुमहाकालमात्रवृत्तिविशेषणतायाविशेषेणसाध्यतायांमहाकालान्यत्वविशिष्टघटाभावोपिनप्रतियोग्यधिकरणः। तत्रतेनसंबंधेनमहाकालान्यत्वविशिष्टघटाधिकरणमसिद्धेरतआह। यस्तुइति। अत्रप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यनधिकरणहेत्वधिकरणत्वंसाध्यीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्षणकरणेपिकालेघटध्वंसादावव्याप्तिरुद्दारस्थैव। साध्यतावच्छेदकसंबंधावच्छिन्नतादृशतादृशप्रतियोगितायाअप्रसिद्धेरतः प्रतियोगितावधिकोभयाभावपर्यंतानुधावनं। समवायेनवस्त्वभावप्रतियोगितायावच्छेदावच्छिन्नत्वस्यसत्वात्संयोगेनघटाभावप्रतियोगितायासाध्यतावच्छेदकसंयोगावच्छिन्नत्वस्यसत्वाद्दंडेनाभूमादिसादाव्याप्तिवारणायसंबंधावच्छिन्नत्वंतद्धर्मा

यच्छिन्नस्य विशेषः संयोगेनघटाभावमतिर्योनिमान्यो धूमस्यवच्छिन्नस्तुघटोनभयाभावसहादतिव्याप्तिवारणायसा
मान्यइति। अप्रसिद्धिरिति। तथाचाव्याप्तिरितिभावः। यदिकुंकुमीयादिमान्नास्तीत्यादेःकेवलीयादिमत्प्रतियो
गिकाभावएवविषयोनेतुंकुंकुमीयादिमत्तत्प्रतियोगितावच्छेदकत्वमपेक्ष्यते। तदायत्किंचिद्घटत्वंसपेक्ष
कुंकुमीयादिमान्नास्तीत्यस्यसामान्याप्तिरितिहृदिनिधायाह। संक्षेपइति। मूलेपक्षतानिरूपणसंगते
रुपदर्शनायतदुपदर्शयति। पक्षत्वमित्यत्रेति। तथाचयद्रूपस्यपरामर्शस्यतद्घटकतयापक्षधर्मत्वमपि
यद्रूपंतदुपपादकत्वरूपोवाव्याप्तिसंसर्गोपक्षतानिरूपणे। व्याप्तिनिरूपितार्थकार्यकारित्वमवसंगति
रितिबोध्यं। मूलेपक्षताऽलक्षणस्येस्पष्टतयाऽनुक्तेः पक्षतालक्षणंस्यादित्यपेक्षायांमूलार्धमाह। सिसाधयि
षाविरहेति। धूमवान्पर्वतोवह्नेरनुमितेरित्यत्रेव्याप्त्यापत्तिसिसाधयिषामात्रस्यपक्षतात्वंनिबंधयति। सि
साधयिषामात्रंनेति। मेघानुमानात्। मेघानुमितेः। अतएव। वक्ष्यमाणदूषणादेव। सिसाधयिषाविरह
रूपविशेषणस्यप्रयोजनमाह। सिद्धौसत्यामिति। अतइति। तथानुमितिनिर्वाहकपक्षतासपत्यर्थमित्यर्थः।
नत्रसिसाधयिषायांसत्यामसत्यांवेति। सत्यामुभयाभावप्रयुक्तस्यासत्यांविशेष्याभावमात्रेणयुक्तस्य
विशिष्टाभावस्यसत्वादितिभावः। सिद्धौसत्यामसत्यांचेति। सत्यांविशेषणाभावमात्रेणयुक्तस्यासत्यांतु
भयाभावेनयुक्तस्यविशिष्टाभावस्यसत्वादितिभावः। सिद्धेःसत्वादिति। सिद्धेःसत्वेनतद्भावरूपप

क्षतायाअभावादितिभावः। सिसाधयिषाविरहविशिष्टंचसिद्धौएककालावच्छेदेनैकाश्रयवृत्तिः। तेनसि
साधयिषाकालीनसिद्धेःकालिकसंबंधेनसिसाधयिषाविरहविशिष्टेनक्षतिः। परामर्शरूपकारणस
त्वेसिद्धिरूपविरोधिसत्वेयद्यनुमितिस्तदातस्याउत्तेजकत्वंवाच्यं। नचैतत्संभवतीत्याशंकते। ननुय
त्रेति। परामर्शानंतरं। परामर्शोयत्रेहेतीयक्षणे। ततः। सिध्वुत्पत्तिहेतीयक्षणे। क्रमेण। अन्यथानेन। एवम
न्यत्रापीति। यत्रपरामर्शसिसाधयिषासिद्धयः क्रमेण। एवंसिद्धिसिसाधयिषापरामर्शाः। एवंसिसाध
यिषापरामर्शसिद्धयः। तत्रेत्यर्थः। सिद्धिकालेपरामर्शकालेचेति। सिद्धिपरामर्शोभयक्षणइत्यर्थः। कथमि
ति। किमर्थमित्यर्थः। इतिप्रत्यक्षमिति। अनुमितीष्टसाधनताविषयकमितिशेषः। प्रत्यक्षोत्पत्तेः पूर्वमनुमि
तीष्टसाधनताधीस्वीकारेच्छासामग्र्याप्रतिबंधात्प्रत्यक्षमेवनस्यादिति। यादृशाद्दृशस्यादि। घटानुमिति
र्जायतामितीच्छासत्वेपर्वतोवह्निमानितिसिध्यत्त्वेपर्वतोवह्निमानित्यनुमित्युत्पत्तेः पर्वतोवह्निमानि
तिसिद्धिसत्वेपितादृशज्ञानतादृशानुमित्यापत्तिरतउक्तंसिद्धिसत्वइति। इदंबोध्यं। उत्तेजकेच्छायाः परिचा
यकरूपमुत्तेजकत्वंतुतत्तच्छास्त्रसिद्धत्वेनेतिबोध्यं। हेतुः। तत्तदिच्छायाउत्तेजकत्वेन। यत्किंचिज्ज्ञानमित्यस्यात्त
दुत्तरकालीनमित्यादिः यत्किंचिज्ज्ञानस्यसर्वदासिद्धत्वेनतद्रूपेणेच्छाविरहात्। नानुमितिरिति। नानुमि
त्यापत्तिरित्यर्थः। तादृशेच्छायास्तच्छास्त्रसिद्धत्वेनोत्तेजकत्वानभ्युपगमादितिभावः। नचयत्किंचिज्ज्ञानंजायतामि
त्येतादृशेच्छाकालेप्यनुमितिर्भवत्येवेतिवाच्यं। अनुमितिसामग्र्यांसत्यामात्मादिविषयकयत्किंचिन्मान स

सामग्रीसत्त्वनियमेनव्यक्तिंविनाऽनुमित्यनुदयात्तस्यैवताद्रूप्यसिद्धेस्तत्रानुमित्यनुत्पत्तिशङ्कापत्त्यसंभवात्।नन्व
नुमितित्वप्रकारकेच्छात्वेनानुगतरूपेणचेत्तेजकत्वंतर्ह्यवश्यं।तावतैवव्यक्तिंविनाऽनुमित्यनुदयसिद्धेरित्याशङ्क्याह।
अतएवतच्छक्तित्वेनेतिजकत्वंकल्प्यंगौरवादित्यतआह।धर्म्यंशावच्छेदेति।प्रत्यक्षातिरिक्तंज्ञानमित्यस्यशाब्दसाम
ग्यसत्त्वादिः।शाब्दसामग्रीसत्त्वेशाब्दबोधेनवेदांशविषयसिद्धिसंभवात्।भवत्येवत्यनुमितिरित्यनेनसंब
ध्यते।तथाचानुमितित्वप्रकारकेच्छात्वेनेतेजकत्वेतत्रानुमितिर्नस्यादितिभावः।तद्लिंगकत्वंतुयद्यस्यफलमा
ह।एवमित्यादिना।नानुमितिरिति।इच्छायास्तत्तच्छक्तित्वेनेतेजकतयातदिच्छाध्वंसेरनुत्तेजकत्वादितिभावः।
इदंबोध्यं।पर्वतेवह्न्यनुमितिर्जन्यतामित्याद्यनुगतेच्छायांपर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितव
ह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेनानुगतरूपेणचेत्तेजकत्वंप्रत्यक्षातिरिक्तंज्ञानंजायता
मित्याद्यनुगतेच्छानांतुतत्तच्छक्तित्वेननतुसकलेच्छानांतत्तच्छक्तित्वेनगौरवादिति।सिसाधयिषाकाले ६८
पर्वतोवह्निमानितिसिद्धिसत्त्वेपिपर्वतोवह्निमानित्यनुमित्यसत्त्वेस्वाद्दशसिद्धेर्नतादृशानुमितिप्रतिब
धकत्वंस्यादतउक्तंसिसाधयिषाविरहकालइति।विशिष्यचक्तव्येति।पर्वतोवह्निमानित्याद्यनुमितौपर्वतत्वाद्य ६८
वच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतानुभवकालेविशिष्यचक्तव्येत्यर्थः।तत्रयो
जनमाह।तेनेति।सिद्धिरवधेयेवकारेणसामानाधिकरण्येनसिद्धिव्यवच्छेदः।सामानाधिकरण्येनानुमितिप्रति
मात्रेणा ७ बंधकत्वेसिद्धिसत्त्वेपिसामानाधिकरण्यानुमितेरसंभवात्।अन्यथा।व्यधिकरणधर्मावच्छेदेनानुमितेरपिसामानाधिकरण्या

यंगाहितयातद्व्यवच्छेदप्रतीतेः।सिद्धिमात्रमिति।पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेनविरोधित्वमित्यर्थः।उपा
ध्यावस्तुसिसाधयिषाविरहविशिष्टस्यसिद्धिमत्यक्षसामग्योरन्यतरस्याभावः।पक्षता।तेनसिद्धिकालेसमा
नविषयकप्रत्यक्षसामग्रीकालेपिवह्नानुमित्यापत्तिरित्याहुः।तदुक्तमितुमत्यक्षसामग्र्याभावस्यपक्षतांकु
क्ष्यवयेशेप्रत्यक्षसामग्रीकालेकथंनानुमितिरित्यत्रदृष्टिंप्रक्षिप्योसानुपादार्थंप्रथमतःस्वसिद्धांतमाह।
इदंबोध्यमित्यादिना।संज्ञायोत्तरमत्यक्षंप्रतिहेतुभूतस्यविशेषदर्शनस्यसंस्कारादितिभावः।एतादृशप्रत्यक्ष ५
सामग्रीविशेष्यपर्यंतानुधावनंचतद्विषयेअनुमितिसामग्रीसंपत्तिदमर्शनार्थं।स्यातंप्रेणानुमितिसाम
ग्रीप्रदर्शनेमयासापत्तेः।स्यातंप्रेणेति।ननुकुक्षिप्रविष्टत्वेनेत्यर्थः।शाब्दसिद्धोसत्यामशाब्दंज्ञानंजायता पक्षता ७
मितीच्छायामनुमितेस्तत्रादासिद्धयनुमितिगोचरेच्छात्वेनतादृशेच्छाकालेप्रत्यक्षसामग्रीकालेअनुमित्य
नुत्पादेनसामग्र्यामनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वेस्वयमकृतयाएकरूपेणोत्तेजकत्वासंभवात्।एव
मुभयत्रसिसाधयिषाविरहस्यनैरर्थक्यंधनविशेषणत्वसिद्धौसमवायघटितसामानाधिकरण्येनचक्षुः सं
योगादिरूपसामग्र्यानुत्पन्नेप्रत्यक्षेसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटितसामानाधिकरण्ये
नेत्येकरूपेणतयोःप्रतिबंधकत्वासंभवादित्याशयइतिदिक्।अनुमितिप्रतिप्रत्यक्षसामग्र्याःस्यातंप्रेण प्र १२ ननु
तिबंधकत्वेसिन्नविषयेपिप्रत्यक्षसामग्रीकालेअनुमित्यनुपपत्तिःमन्मतेतुमानातिरिक्तप्रमाहतसा
ध्यसाधकमानत्वेनपक्षतांकुक्षौतस्याःप्रवेशोनोक्तापत्त्यनवकाशादतआह।एवमिति।अनुमितिसामग्री

प्रतिबंधकेति। तथा च मिन्नविषयकानुमितिसामग्र्यभावघटितमत्यक्षसामग्र्यास्तु। नाभावान्नप्रयोजिकस्यात्। नु
म्नित्यनुपपत्तिरितिभावः। यद्वा। अनुमितिसामग्री मतिबंधिका। अनुमितिसामग्र्येयमतिबंधिका। नतुमिन्ने
विषयमत्यक्षसामग्र्यनुमितोप्रतिबंधिकेत्यर्थः। तथा च मत्यक्षसामग्र्याः समानविषयकानुमितिंप्रत्येयमति
बंधकतयानप्रयोजकानुपपत्तिरितिभावः॥७॥ हेत्वाभासानिति। विजयलक्षणफलकार्यकारित्वमत्रसंगतिर्वा
ध्या। ननुलक्षणालक्षसाधारणधर्मविशेषजिज्ञासानुदयाद्विभागोनिष्प्रयोजनइत्यतोलक्षणमाह। त
लक्षणंत्विति। हेत्वाभासलक्षणंत्वित्यर्थः। लक्ष्यलक्षणंग्राहयितुंतथाहीत्यादेः। व्यचारादयः। ननुयद्विषय
कत्वेनेत्यत्रतत्साध्यविशेषकत्वंतथाचवह्निमान्धूमादित्यत्रेवन्हयभावे तिव्याप्तिः। पर्वतविशेष्यकयन्हय
भावप्रकारकनिर्णयत्वेनवन्हयनुमितिप्रतिप्रतिबंधकत्वेवन्हयभावविषयकत्वस्यप्रतिबंधकतावच्छेदक
कोटिप्रविष्टत्वात्। नचैवंरूपसंबंधावच्छेदकतापर्याप्त्यधिकरणत्वंअनतिरिक्तवृत्तित्वंवा। वच्छेदकत्वंतटी
यार्थः। वन्हयभावविषयकत्वस्यावच्छेदककोटिप्रविष्टत्वेप्यवच्छेदकतापर्याप्त्यनधिकरणत्वादतिरिक्तवृत्ति
त्वाअनतिव्याप्तिरितिवाच्यं। पर्याप्तिनिवेशे। सभवापत्तेः। अप्रामाण्यज्ञानानाकांक्षितस्याधिकस्यप्रतिबं
धकतावच्छेदककोटिप्रविष्टत्वात्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे। हदोवह्निमान्धूमादित्यादौवन्हय
भावविशिष्टह्रदादावव्याप्त्यापत्तेः। प्रतिबंधकत्वाभावघटितह्रदइत्येतादृशज्ञानेवन्हयभावविशिष्टह्रद
विषयकत्वस्यसत्वात्। विशिष्टह्रदस्यह्रदानतिरेकादित्यतआह। यद्विषयकत्वेनेति। एतद्दक्षणप्रयोज

नमाह। तेनेति। बाधपक्षमस्य। बाधपक्षमसाधारणस्यापर्वतविशेष्यकवन्हयभावप्रकारकत्वादित्यर्थः। अनुमितिविशे
षितेवि। अनुमितिविशेषितावच्छेदकत्वेवि। नक्षतिः। नवन्हयभावादावतिव्याप्तिः। इतरथानुवन्हयभावविषयकत्व
स्यपर्वतविशेष्यकवन्हयभावप्रकारकरूपानुमितिप्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात्तत्रातिव्याप्तिः स्यादिति
भावः। यादृशविशिष्टेतिविशेषणेतुतत्रनातिव्याप्तिरित्याह। तत्रेत्यादिना। नचैवन्हयभावविशिष्टपर्वतस्याप्रसि
द्धत्वेपियादृशविशिष्टपदेनवन्हयभावत्वविशिष्टंवन्हयभावमुपादायतत्रातिव्याप्तिरितिवाच्यं। यादृशविशिष्टे
तिविवक्षणे। नतिरिक्तवृत्तित्वस्यैवबाधावच्छेदकत्वस्यलक्षणेनिवेशनीयतयावन्हयभावविषयकत्वस्यप्रतिबंध
कत्वाभावघटितवन्हयभावइतिज्ञानेऽतेस्तत्रातिव्याप्तेरभावात्। नचैवंपूर्वोक्तरीत्यावन्हयभावविशिष्टह्रदादाव
व्याप्तिरितिवाच्यं। यादृशविशिष्टविषयकत्वेनेत्यस्यपर्वतविशेष्यकवन्हयभावप्रकारकत्वात्तत्तत्यस्यचत
दृत्वमित्यर्थकत्वात्। ह्रदइतिज्ञानेवन्हयभावावच्छिन्नविषयकत्वाभावात्। अथाज्ञानतिरिक्तवृत्तित्वरूपस्या
वच्छेदकत्वस्यविवक्षणेऽनुमितिप्रतिबंधकत्वाभावघटितह्रदोवह्निमान्धूमेतिसंशये ह्रदोवन्हयभावेत्याका
रकनिश्चयेऽप्रामाण्यज्ञानानाकांक्षितत्वादज्ञानिश्चयेचवन्हयभावविशिष्टह्रदविषयकत्वस्यसत्वादसंभवइ
तिचेन्न। ज्ञानत्वेसत्यज्ञानपदस्यानाहार्यप्रामाण्यज्ञानानाकांक्षितनिश्चयेपरतयातादृशनिश्चयेपिछया
दृशविशिष्टविषयकत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमित्यर्थलाभादितिदिक्॥ ॥सत्प्रतिपक्ष
स्यानित्यदोषत्वभादीशंकते। नचयत्रेति। विशिष्टस्याप्रसिद्धत्वादिति। योषागमयत्रेवन्हयभावव्याप्यधूमा

यादितिभावः। इष्टापत्तेरिति। तथाचतद्धेतूनांप्रतिपरामर्शेऽपिन दुष्टत्वमितिभावः। अन्यथा। प्रतिबंधकीभूतभ्रमविषय
स्यादिदोषत्वे। अग्नित्वदोषत्वापत्तेरिति। पक्षेसाध्याभावभ्रमदशायांसद्धेतावदिदोषत्वापत्तेरित्यर्थः। इत्थंच। म
दृशविशिष्टविषयकत्वेनज्ञानस्यप्रतिबंधकत्वंतादृशविशिष्टस्यदोषत्वेच। हेत्वादिकमित्यादिनासाध्याभावविशि
ष्टपक्षपरिग्रहः यादृशविशिष्टपदेनव्यभिचारत्वादिविशिष्टंव्यभिचारादिकमादायलक्षणंनसंभवतिव्यभि
चारविषयकत्वस्यप्रतिबंधकतामूल्येव्यभिचार इतिज्ञानेऽतिरिक्तत्वसिद्धात्। किंतुव्यभिचारादिवि
शिष्टहेत्वादिकमादायेतिव्यभिचारादिविशिष्टहेत्वादिकमेवदोष इतिभावः। ननुव्यभिचारादिविशिष्टस्यहे
तोर्दुष्टत्वेतद्दृत्यस्यहेतावभावाद्धेतोर्दुष्टत्वव्यवहारोनस्यात्। नचतादात्म्येनतद्दृत्तिविवक्षणीयमितिवाच्यं।
तथासतिधूमत्वाभावविशिष्टह्रदादेस्तादात्म्येनधूमेऽभावोनह्रदपक्षकेधूमस्यदुष्टत्वंनस्यादतआह। तद्दृत्त्य
र्थेति। नचयद्भिव्यभिचारविशिष्टद्रव्यत्वादेर्धूमेविसत्वादतिव्याप्तिरितिवाच्यं। यादृशविशिष्टविषयकज्ञाने
येनयद्धेतुकानुमितिप्रतिबंधकत्वंतादृशविशिष्टाग्रतद्धेतुत्वस्यैवदुष्टत्वादिति। सत्प्रतिपक्षादेरनित्य
दोषत्वादिनामतमाह। परेत्विति। ननुव्यभिचाराभावादिज्ञानेसत्यपिसाध्यसंशयानुदयात्तत्राप्यनुमि
तिप्रसंगधूमस्यदुष्टत्वंस्यादतआह। तद्दृत्त्येति। ज्ञानेति। एकज्ञानविषयत्वेनतद्दृत्त्यमित्यर्थः। तद्दृत्त्य
स्य। साध्याभावत्वस्यातंत्र। बाधकालीनेधूमादिसद्धेतावित्यर्थः। अत्र। प्रतिपरामर्शकालीनेधूमादि

सद्धेतौ। तत्कःसमाद्। ज्ञानस्यसंबंधत्वकःसमाद्। ननुसद्धेतावबाधितत्वव्यवहारेणसंबंधत्वकल्पनंज्ञानस्य
भविष्यतीत्यतआह। तत्रेति। बाधभ्रमकालीनेसद्धेतावित्यर्थः। प्रकृतायंनयोधितः पुरुषस्तूष्णींतिष्ठेत्यस्य
वहारादितिभावः। तादृशव्यवहाराव्यवहारयोःस्वानुभवमात्रसाक्षित्वमाहुरित्यरसवोजं। मथाप्यतद्वि
शेषित्वमागवोजमाह। तेनेत्यादिना। ननुतद्धेतुकतत्साध्यकानुमितिंप्रतितद्धेतोस्तत्साध्यव्यभिचारग्रहो
भावोहेतुर्दुष्टत्वप्रयुक्तआह। तद्भावेति। नक्षतिः। नाध्यासिः। ननुअत्रलक्षणेअवच्छेदकत्वंनस्वरूपसंबंधविशे
षः पूर्वोक्तदोषादित्यनतिरिक्तत्वमेवनिवेदनीयं। तथाचधूमवान्नह्रदित्यादौधूमेयत्वविशिष्टव्य
भिचारेतिव्याप्तिरुद्भावयत्वस्यप्रतिबंधकतानतिरिक्तत्वसिद्धात आह। संक्षेपइति। प्रहरता
नुमितिप्रतिबंधकतावच्छेदकांतराघटितत्वेनानुमितिविरोधितावच्छेदकंविशेषणीयंप्रमेयत्वविशि
ष्टव्यभिचारस्यच प्रहरतानुमितिप्रतिबंधकतावच्छेदकीभूतोयोव्यभिचारस्तद्घटितएवेतिनतथाति
प्रसंग इतिदिक्। नन्वत्रानुमितितत्करणज्ञानान्यतरत्वप्रतिबंधकत्वमन्यतरनिष्ठप्रतिबंधतानिरूप
कत्वघटितंयदितदापर्यंतोवन्हिमान्धूमादित्यादोवह्न्यभावविशिष्टह्रदस्यादिदोषनाप्रसंगः। तस्य
पर्यंतोवन्हिमान्नि[illegible]ह्रदोवन्हिमानितिसमूहालंबनात्मकप्रहरतानुमितिनिष्ठप्रतिबंधतानिरूपि
तप्रतिबंधकतावच्छेदकत्वाद्। यदिचतादृशान्यतरत्वावच्छिन्नप्रतिबंधतानिरूपितत्वघटितंतदा

तादृशान्यतरत्वस्यकस्यचित्प्रतिबध्यतानवच्छेदकतया संभवः। तादृशान्यतरत्वव्यापकप्रतिबध्यतानिरूपितत्व
व्याप्तिधारादौ बाधादौ-बाध्याप्तिः। व्याप्तिधारादेरनुमित्यधिरोधितया बाधादेश्च व्याप्तिज्ञानाधिरोधितया
तत्प्रतिबध्यतायाश्चाधिकान्यतरत्वाव्यापकत्वात्। किंचित्तद्धर्मविच्छिन्नपक्षकतद्धर्मविच्छिन्नसाध्यक
तद्धर्मविच्छिन्नहेतुकानुमितिकरणज्ञानान्यतरविरोधित्वंलक्षणेनिवेशनीयं। अन्यथापर्वतोवह्निमा
न्धूमादिसादोपर्वतादःकांचनमयत्वाभावोहेत्वाभासः स्यात्। एवंचनिर्वह्निःपर्वतोवह्निमान्निर्वह्निमा
नित्यादीनकोविहेत्वाभासः स्यात्तादृशानुमितेरप्रसिद्धेरतआह। यादृशसाध्यवति। संभवतीति। यायुर्ध
वान्प्रमेहादित्वादीसर्वहेत्वाभाससंभवइतिभावः। हेत्वाभासलक्षणानुक्त्वामूलक्षयमाणेषु अनैकांति
कादिलक्षणेषुकचित्कचिद्दोषहृदिनिधायस्वयमनैकांतिकादीनांलक्षणान्याह। एवमिति। साधारणा
दीत्यादिना। साधारणानुपसंहारिणोःपरिग्रहः। ननुतेस्यानुमितितत्करणज्ञानान्यतरविरोधिज्ञान
विषयकसाध्याभावाश्रयहेत्वाभासत्वमितितादृशेताबीजमाहतेनचेति। एवमग्रेपि। ऋतइति। व्याप्ति
घटकाग्न्यभिचारादेर्व्यभिचारज्ञानेस्वप्रतिबंधकत्वादितिभावः। प्रतिबध्यतइति। व्याप्तिघटकीभूत
सामानाधिकरण्यग्रहःप्रतिबध्यतइत्यर्थः। एवंचसाधारणासाधारणानुपसंहारिणाव्याप्तिज्ञानप्र
तिबंधरूपदूषकतावीजंयेषांतेकहेत्वाभासत्वमुपपद्यते। साधारणेनाग्न्यभिचारग्रहस्यासाधा

रणेनसामानाधिकरण्यग्रहस्यानुपसंहारिणाव्यतिरेकव्याप्तिग्रहस्यप्रतिबंधादितिभावः। माथीमतमा
ह। अन्येत्विति। पक्षेसाध्यसंदेहदशायामेवासाधारणस्यहेत्वाभासतानतुनिश्चयदशायांतदापक्षस्येवस
पक्षस्येतत्रसाध्यव्याप्यत्वज्ञानाभावादित्यनित्यदोषतंतस्येत्याह। इदंचेति। असाधारणघटकसपक्षत्वस्य
निश्चयस्यघटितत्वेचेत्यर्थः। तत्र। निश्चितसाध्यवतिपक्षे। साधारणादित्रयाणामेकहेत्वाभासत्वानुपपत्ति
र्दर्शनेनात्यरसःसूचितः। व्यतिरेकव्याप्तिग्रहप्रतिबंधइति। कथंतान्यधिसाध्यकेवान्ययव्याप्तिज्ञा
नादेरनुमितिरितिभावः। ननुएवंसाध्याभावसाधकात्सत्प्रतिपक्षा[illegible]दिदुष्टस्यभेदोनस्यादतआह।
सत्प्रतिपक्षेत्विति। प्रतिहेतुः। प्रतिकूलोदितोहेतुः। इतिविशेषः। इत्यनयोर्भेदः। ननुदूषकतावीजे
क्येविहेतुभेदात्सत्प्रतिपक्षाहेत्वंतरमिश्रकमेतदाद्यान्यथिनाहेत्वंतरेण
प्रतिरोधस्तत्रसत्प्रतिपक्षोयत्रतुव्यतिरेकिणातत्रतुहेत्वाभासांतरंस्यादितिभेदकांतरमप्याह। सा
ध्याभावेति। यस्तुगम्यसाध्याभावसाधकेहेतावेतत्वसंबंधस्यभ्रमइतिस्थापनायादिनंप्रतिक्षेपरू
पाशक्तिसूचकत्वंधिरुद्धत्वंनतुएवंसत्प्रतिपक्षस्येतिभावः। साध्याभावव्याप्येति। एवंसाध्यदन्यत्व
व्याप्यधर्मवत्त्वंपक्षनिष्ठोसाध्याभावसाध्यकदन्यत्वव्याप्यावच्छेदकोधर्मो। अन्यतमत्वादिनानुगमा
नविभागव्याघातः। सत्प्रतिपक्षध्वहारेपविबलमन्येषांसत्प्रतिपक्षलक्षणमाह। अगृहीतेति। नि

स्तथाप्यशब्दधर्मत्वान्नान्यकाले नानित्यस्तथाप्यहरतकत्वपरामर्शसत्वेपिसत्प्रतिपक्षव्यवहाराभा
वात्कालेनांतमुपस्थितिविशेषणाद्गृह्यतामामाण्यकनित्यस्तथाप्यसाज्ञानकालेनानित्यस्तथाप्यहरतक
त्वपरामर्शसत्वेपितद्व्यवहाराभावादगृह्यतामामाण्यकेतिप्रयोपस्थितिविशेषणात्तदाकालेनानित्य
स्तथाप्यपरामर्शसत्वेपितत्रामामाण्यग्रहेतथाव्यवहाराभावादृष्टहीतामामाण्यकत्वदितीयोपस्थितिविशेषणा
व्यवहारमात्रोपयोगिनोनित्यरूपस्यग्रहेतानुपयोगः।उपस्थितिघटितस्योक्तरूपस्यस्वरूपसतएवोपयुक्त
स्याभासतायामयोजकत्वादित्यरुचेरसंगत्यत्यन्यइति।सत्प्रतिपक्षस्यदूषकतांबीजंतत्वनुमितिप्रतिबंधकत्वंतदभावयाप्यवत्तानिश्चय
त्यादिना।सत्प्रतिपक्षस्यसंशयजनकत्वंदूषकतांबीजंतत्वनुमितिप्रतिबंधकत्वंतदभावयाप्यवत्तानिश्चय
नुमितिप्रतिबंधकत्वेमानाभावादितिरत्नकोशकारमतंदूषयितुमुपन्यस्यति।अत्रकेचिदित्यादिना।अनु
मितिर्नजन्यतेचेति।अनुमितिंप्रतितदभावयाप्यवत्तानिश्चयस्यप्रतिबंधकत्वेमानाभावात्कूटस्थतत्तदभाव
नुमितिसामग्रीभावतत्तदभावकोटिसंशयानुमित्यापत्तौसंशयानुमितिंप्रतिउभयव्याप्यवत्तानिश्च
यत्वनातिरिक्तहेतुताकल्पनमयुक्तंगौरवाभावाच्चेतिभावः।ननुयद्युभयभासकसत्वेउभयज्ञानंतदापित्ता
दिदोषसत्वेपीतेत्यत्रकुत्रोभयस्फुटतायुभयोभानिपत्तिरित्यतआह।फलबलेनचेति।तथाचतत्रपीतस
साक्षात्कारस्यैवानुभाविकतायांकुत्रग्रहेपित्तरूपदोषस्यप्रतिबंधकत्वकल्पयित्वापीतसाक्षात्कारसा
मग्र्याधिकबलत्वमेवदूरत्वदोषसत्वेपिस्थाणुत्वपुरुषत्वयोःस्फुटतोसंशयस्यैवोदयात्तत्सामग्र्योःसम

७२

७२

बलत्वमेवकल्प्यतइतिभावः।ज्ञानमात्रेतादृशज्ञानत्वावच्छिन्नेविशेषेदोषविशेषाजन्येगौरवादिति।कार्य
कारणभावद्वयकल्पनेगौरवादितिभावः।कथमनुमितिरिति।अनुमितेरपिप्रतिबंध्यतावच्छेदकांतत्वादि
तिभावः।कथंतर्ह्युभयव्याप्यवत्तानिश्चयात्तत्रमात्रसिकः संशयइत्याशंक्यनभवत्येवतावद्यावत्तन्निश्चये
अप्रामाण्यंनगृह्यतइत्याह।यत्रचेति।आश्रयासिध्यादीत्यादिनास्वरूपासिद्ध्याद्यसिध्योःपरि
ग्रहः।साध्यासिध्यादीत्यादिनाविरुद्ध्यंनिराकरोति।साध्यासिध्यादयइति।आदिनासाधनाप्र
सिद्धिपरिग्रहः।केषांचिन्मतमाह।एवंधूमोनित्यादिना।यदंतीत्यादिनास्वरसस्तुजंतुनालेधूमे
व्याप्तिसत्वाकथंव्याप्यत्वासिद्धिः।नचतत्रव्याप्तिसत्वेपिनालधूमत्वस्यानवच्छेदकतयातदवच्छेदेनव्या
प्यत्वासिद्धिरेवेतिवाच्यं।अनतिरिक्तइतित्यरूपावच्छेदकत्वस्यनालधूमेपिसत्वात्।स्वरूपसंबंधरूपा
वच्छेदकत्वाभावाद्व्याप्यत्वासिद्धिरित्यपिन।तथासतिपर्वतोमान्सास्नादिमतइत्यादावपिव्याप्यत्वासि
ध्यापत्तेः।सास्नाद्यपेक्षयागोत्वादिजातेर्लघुत्वेनसास्नादेःस्वरूपसंबंधरूपावच्छेदकत्वाभावात्।अस्तुत
नालधूमत्वादेःस्वरूपसंबंधरूपावच्छेदकत्वाभावात्तदवच्छेदेनव्याप्यत्वाभावरूपाव्याप्यत्वासिद्धिर्नतितस्मा
हेत्वाभासत्वं।अनुमितिकारणीभूतव्याप्तिज्ञानविरोधित्वात्।नचवह्निमदन्योन्याभावत्तिप्रमेयत्वानि
प्रमेयत्वसामानाधिकरण्येनव्याप्त्यग्रहज्ञानादनुमित्यापत्तिवारणायहेतुतावच्छेदकावच्छेदेनव्या

त्येव

बधशास्त्रदृष्टियजन्यः शंखः पीतद्रव्यारोपेण पीतद्रव्यानुभवस्य सिद्धस्तादृशदोषेण नियमेन प्रतिबध्यप्रतिबंधकभावे
दिदोषविशेषाजन्यत्वं प्रतिबध्यतावच्छेदकनिवेशेनापेक्षितमित्यर्थः। ननु बाधप्रतिबध्यतायां छेदकं कोटौ लौकि
कान्यत्वस्य निवेशो बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिरिति चेन्न। भूतले घटवदित्याकारक
लौकिकप्रत्यक्षोत्पत्तिकाले स्वात्यंतेणकथंचिदुपस्थितस्य घटाभावादेर्भूतले प्रकारतयाभानवारणायसमा
नधर्मितावच्छेदकतत्कोटिलौकिकप्रत्यक्षसामग्र्यादिपरीतकोटिभानप्रतिबंधकत्वमवश्यमंगीकरणीयं। त
थाचबाधनिश्चयोत्तरमपि नापन्नौलौकिकसन्निकर्षजन्यसंशयस्यतत्कोटौलौकिकप्रत्यक्षसामग्र्याःप्रति
बंधिकायाः सत्त्वेनपरीतकोटिभानासंभवात्। नहिह्रदादिलौकिकसन्निकर्षजन्यसंशयोनस्यादितिवेदाभ्र
मप्रमासत्त्वेपूर्वोपस्थितकोट्योर्भानसंभवादिति। यद्यु संशयात्प्रथमतोऽयंलौकिकसन्निकर्षसत्त्वे
कथंसंशयस्यनलौकिकत्वंकथंवातत्रसंशयेपरीतकोटिभानं। नतत्कोटिलौकिकप्रत्यक्षसामग्र्याःप्रतिबं
धिकायाःसत्त्वात्तत्रसत्त्वादितिचेन्न। तत्रलौकिकसन्निकर्षसत्त्वेपिसंशयजनकदूरत्वादिदोषस्यलौकिकप्रत्य
क्षप्रतिबंधकस्यसत्त्वेनलौकिकप्रत्यक्षसामग्र्याबाधादुभयोरप्रवृत्तेरित्यन्यत्रविस्तरः। यस्यचिन्मतेदृष्ट
मिति। नन्विति। इतियुक्तंदूषणमित्यनेनान्वयः। नन्वेवंबाधनिश्चयकालेसाध्यसंसृष्टत्वज्ञानाभावादेवानुमित्य
भावोपपत्तौबाधनिश्चयस्यानुमितिविरोधित्वमितिहेत्वाभासत्वंनस्यादतआह। तद्विरोधितयेति। अनु

मितिकारणीभूतसाध्यसंसृष्टत्वज्ञानविरोधितयेत्यर्थः। नन्वेवमपिदुःसाध्यकानुमितिःकुत्रापिनस्यादेवेस्व
तआह। साध्यसंशयेति। ननुसंशयस्यान्यकालेविद्यमानसाधनिषेधकालेनसाध्याभावनिश्चयात्मकंसाध्यसंसृष्ट
त्वज्ञानमस्त्येवेस्यतआह। आदीति। आदिनासिद्धविरुद्धपरिग्रहः। नचसंशयांतरोत्पत्त्यैवा
नुमितिरितियाच्यं। सतिविशेषदर्शनेसंशयायोगात्। पक्षेविद्यमानेऽप्यकसाध्याभावज्ञानप्रमात्वनिश्चयो
ऽनुमितिप्रतिबंधकस्तदभावःकारणमनरुद्धादृशप्रमात्वमेवबाधइतिप्राचीनमतंदूषयति। एवमिति। प्रमा
त्वज्ञानमपि। प्रमात्वनिश्चयोपि। मानाभावादिति। ग्राह्याभावानवगाहिनस्तादृशज्ञानस्यविरोधित्वेमानाभा
वादित्यर्थः। ननुपक्षेसाध्याभावज्ञानेपितत्रप्रामाण्यज्ञानकालेऽनुमितेरदर्शनान्नसाध्याभावज्ञानप्रतिबं
धकं। अस्मन्मतेतुतदासाध्याभावज्ञानप्रमात्वनिश्चयाभावादेवानुमित्युत्पत्तिरतआह। गौरवादिति।
तस्मात्तत्रानुमितिर्निर्दोषहेत्वसंशयनिश्चयसाधारणप्रामाण्यज्ञानाभावएवप्रतिबंधकतावच्छेदकको
टौनिवेश्यतेनतुपक्षविद्यमानसाध्याभावज्ञानप्रमात्वनिश्चयतत्तेनप्रतिबंधकत्वं गौरवादित्यर्थः। यत्र
पक्षेसाध्याभावज्ञानमस्तिनतुतत्रप्रामाण्यज्ञाननयाभाण्यज्ञानंतत्रानुमितिर्नभवेत्येवंतिभावः। साध्या
भावज्ञानघटितप्रमात्वविषयकेऽनुमितिप्रतिबंधकतानतिरिक्ष्यतेत्यसत्यानेस्याभासत्वंदुर्व
चमितितुन। प्रमेयत्वविशिष्टव्यभिचारादृश्यतादृशविशिष्टांतरघटितेनाभासत्वायोगादिति। ननुभ्र

ग्रहेतामामान्यकसाध्याभावनिश्चयस्यप्रतिबंधकत्वेयथोपस्थितप्रमात्वनिश्चयएवतथास्यादतआह।
अन्यथेति।सत्प्रतिपक्षादिधियादिना।सिध्यादिपरिग्रहः।प्रतिबंधकत्वापत्तेरित्यस्यानुमित्यादिधियादिः।
ननुसाध्याभावज्ञानप्रमात्वज्ञानेअनुमितिप्रतिबंधस्तदभावेतुनेत्यन्वयव्यतिरेकाभ्यांप्रमात्वज्ञानस्यानुमि
तिप्रतिबंधकत्वमतआह।किंत्विति।धीधिदुपयुज्यतइति।तथाचानुमितितत्कारणज्ञानान्यतरप्रतिसाक्षा
त्प्रतिबंधकीभूतज्ञानविषयसाध्याभावान्नसाध्याभावप्रमात्वहेत्वाभासइतिभावः।व्यभिचारज्ञानादेरित्यादि
ना।सिद्धिज्ञानपरिग्रहः।सेत्स्यदिति।तथाचबाधस्थलेसिद्धिव्यभिचाराद्यन्यतरनियमेपिबाधज्ञानस्यव्य
भिचारादिविषयकत्वाभावेनतस्यहेत्वाभासांतरत्वमितिभावः।नचहेतुमान्पक्षःसाध्याभावनिश्चयाकार
कएवबाधग्रहःकुतोनभवतिसामग्र्यासत्वात्।तथाचव्यभिचारज्ञानोत्तिकेवबाधबुद्धिरितिवाच्यं।पराम
र्शत्वेनबाधव्यभिचारज्ञानरूपप्रतिबंधकसत्वेनबाधबुद्ध्यभिचारविषयकत्वासंभवात्।एकत्रहेतौव्य
भिचाराव्यभिचारविषयकेनिश्चयासंभवाच्च।अन्यथागोलक्षपक्षकधूमसाध्यकवन्हिहेतुकेबाधेलौ
किकप्रत्यक्षबाधव्यभिचारलौकिकप्रत्यक्षमपिव्याप्तिनिश्चयेसत्यपिबाधेव्यर्तत्यतआह।किंचेति।अ
किंचित्करइति।व्यभिचारज्ञानंहिअनुमितौनसाक्षात्प्रतिबंधकंकिंतुपरामर्शप्रतिबंधकद्वारा।तथाचप ७५
रामर्शोत्तरकालीनव्यभिचारज्ञानमकिंचित्करमितितत्रबाधबुद्धेरेवप्रतिबंधकेतिभावः।व्यभिचारा

घसंकीर्णमित्यबाधेमदर्शयन्नि।एवमित्यादिना।बाधस्थेवेति।तत्रपक्षेहेतुसत्वेनस्वरूपासिद्धेःप्रतियोगिव्य
धिकरणसाध्याभावयद्धेतुत्वस्यव्यभिचारस्यचाभावादितिभावः।बाधतद्व्याप्यव्यभिचाराभ्यांहेत्वाभासस्त
द्व्याप्याअपितन्मध्यएवांतर्भवंतीतिपाठः।बाधः साध्याभावविशिष्टपक्षादिज्ञानंतद्व्याप्यः सत्प्रतिपक्षस्तद्धि
र्व्याप्यव्यभिचारविरुद्धासिद्धास्तद्व्याप्यानांतेष्वंतर्भावइत्यर्थः।व्यभिचारादेरित्यव्यभिचारादिव्याप्यस्यापि
व्याप्तिग्रहप्रतिबंधकज्ञानविषयत्वेनपंचहेत्वाभासानांतर्गतत्वेनतस्यातिरिक्तहेत्वाभासत्वंस्यादित्य
र्थः।नप्रतिबंधकइति।साध्याभावव्याप्यवत्तोज्ञानस्यसाध्यवत्तोज्ञानविरोधित्वेमानाभावादितिभावः।
दृषतावीजस्यग्निन्तर्यति।साधारणस्यव्यभिचारज्ञानेविरुद्धस्यज्ञानसामानाधिकरण्यग्रहेप्रतिबंध
कत्वादितिभावः।अत्रसाधारणघटकंपक्षत्वंनिश्चयगर्भंनतुसाध्यवत्त्वमात्रमितिसाह।सपक्षइति।एवम
न्वेपि।सपक्षत्वंविपक्षत्वंचनिश्चयनिवेशस्यफलमाह।शब्दइत्यादिना।पूर्वमुक्तमिति।असाधारणःसाध्य
समानाधिकरणइत्यादिनोक्तमित्यर्थः।केवलान्वयिपक्षकइति।अत्रपक्षेसाध्यसंशयरूपाग्राह्यते नी१०
नसर्वमभिधेयंप्रमेयमित्यादिस्थलेवेदासिद्धिःसिसाधयिषाविरहविशिष्टसिध्यभावस्यतदानीं
व्यभिचारसंशयेनसामानाधि
करण्यघटितव्याप्तिग्रहसंभवात्तस्यसद्धेतोरलक्ष्यतयासिसाधयिषाविरहविशिष्टसिध्यभावस्यतदानीं
व्यभिचारसंशयेनसामानाधिकरण्यघटितव्याप्तिग्रहसंभवात्।अनुपसंहारिणोहेत्वाभासस्यमुपपादयति।सर्वमभिधेयमित्यादिना।

सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्यलक्षणेतराभावादिति। संशयोत्पत्तिक्षणेनिश्चयधारणायनिश्चयंप्रतिसंश
यसामग्याःप्रतिबंधकत्वस्यायुक्तत्वाच्चतयाग्रहणेसर्वत्रसाध्यसंदेहसत्वेतत्पूर्वंतत्सामग्याःसत्वेनसाध्यनि
श्चयस्यकुत्राप्यसंभवेनव्याप्यसाध्यसामानाधिकरण्यविशिष्टधूमत्वादिरूपव्याप्तिग्रहानुत्पादान्नतत्रानुमिति
रित्यनुपसंहारिणोहेत्वाभासत्वमितिभावः। क्षतेरभावादिति। तदानीमविरुद्धत्वान्यपक्षताया(स्व)रूपस्यानुप
संहारित्वस्यक्षतेरभावादित्यर्थः। तथाचतत्रानुपसंहारित्वस्यसत्वान्नव्याप्तिग्रहानुत्पादप्रयोजकत्वाभाव
ईत्वाभासत्वानुपपत्तिरितिभावः। नचसंशयसामग्याःसत्वेऽपक्षैकदेशेसाध्यनिश्चयइतिवाच्यं।सर्वत्व
धर्मिताश्छेदकसंशयसामग्रीसत्वेघटत्वादिधर्मिताश्छेदकसाध्यनिश्चयोत्पादेबाधकाभावात्। समान
प्रकारकत्वेनैवविरोधात्। समानविषयत्वेनप्रतिबंधकत्वेप्याह। अस्तुवेति। तस्यासहचारिणोग्रहस्य। तस्यस्वरू
पसत्तयैवविरोधित्वेनतद्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वाभावादितिभावः। नचतत्रसहचारिग्रहप्रयो
जकःसंशयएवहेत्वाभासस्तुस्वरूपसत्तयैवविरोधित्वात्। नचसंशयविषयस्यसाध्याभावविशिष्टपक्षा
देरेवतत्राभासत्वेमितिवाच्यं। सर्वमभिधेयमित्यादावभिधेयत्वाभावविशिष्टपक्षादेरप्रसिद्धेरित्यन्यत्रविस्तरः।
नदर्थदृष्टिर्नेतासाधारणेनानिष्यादिरितिभावः। धूममात्रगाभावत्वेति। तस्यव्याप्यतावच्छेदकीभूतधूमत्वघटितत्वे
नतत्संग्रहेनस्यादितिभावः। स्वस्यस्वाश्रयविषयकेप्रतीतिविषयत्वरूपस्याघटितत्वाभावाद्धूमत्वेति। नचनील
धूमत्वस्यापिनादृशधर्मतिराघटितत्वमस्त्येव। धूमत्वस्यनीलधूमत्वभिन्नत्वाभावादितिवाच्यं। स्वाविषयकम

तीतिविषयतास्यस्वपर्याप्तसाध्यछेदकतानिरूपकप्रकारतानिरूपितसाध्यछेदकता[illegible]पर्याप्तस्यनधिकरणत्वप
र्यवसितस्यतदर्थत्वात्। मुद्गधूमत्वपर्याप्तसाध्यछेदकताकप्रकारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्तसाध्यछेदक
ताकप्रकारत्वयोर्भेदात्। नन्वेवंवह्निमदन्याद्वह्नित्यस्यवह्निव्याप्यतावच्छेदकत्वानुपपत्तिः। तस्यवह्नित्वरूपतादृ
शधर्मांतरघटितत्वात्। धूमान्यत्वादेर्व्यर्थत्वात्। नचैवंवह्निमदन्याद्वह्नित्वापत्तिरिष्टापत्तिरेवेति। नचैवं
क्षणस्थायित्वादित्येवंरूपस्वसमानाधिकरणपदेनस्वव्यापकस्यविवक्षितत्वात्। वह्नित्वस्यवह्निमदन्याद्वह्नि
त्वाव्यापकत्वाद्धूमत्वस्यधूमान्यत्वव्यापकत्वाच्चोक्तदोषासंभवात्। स्वव्यापकत्वंचधर्मांतरस्यस्वघटकसाध्य
संबंधितावच्छेदकत्वेन। अन्यथाधूमालोकान्यतरत्वस्यवह्निव्याप्यतावच्छेदकत्वापत्तेः। धूमत्वालोकत्वयोःप्रत्ये
कमन्यतरत्वाव्यापकत्वादिति। विरुद्धयोःपरामर्शहेत्वोरित्यत्रविरुद्धयोर्हेत्वोःपरामर्शइतिभ्रमवारणायाह। स्व
साध्येति। स्वसत्पतिपक्षतेनाभिमतोहेतुस्तत्साध्यस्यविरुद्धोयःसाध्याभावइत्यर्थः। ननूत्पत्तिकालीनघटइ
त्यादिमूलोक्तमनुकूलेनपक्षेघटंधर्म्यन्यत्वाभावादतआह। पक्षतावच्छेदकेति। कालस्येदंरूपस्यापिपक्ष
तावच्छेदकत्वेबाधसंभवात्तदभिदंरूपेणमूलस्यन्यूनतांपरिहरन्नाह। एवमिति। धीधमिति। तत्रपक्षेऽक्षेसंयो
गसत्वेपिपक्षतावच्छेदकमूलावच्छेदेनसंयोगाभावादितिभावः॥ ॥इत्यनुमानं॥ ७॥ ७॥ ॥ ॥ ॥

DR. BHAU DAJI
MEMORIAL

॥श्रीगणेशायनमः॥अथसरसंगतिमाकिप्रेत्याह।उपमितिरिति।तत्र।गवयपदे।सादृश्यञ्चदर्शनं।सादृश्यप्रत्यक्षं।
तदुपमितिकरणमिति।नचैवमतेनैतत्।अतिदेशवाक्यार्थज्ञानंशब्दोधःकरणमतिदेशवाक्यार्थस्मरणव्यापारः।सा
दृश्यविशिष्टपिंडदर्शनंसहकारीतिसंप्रदायमतंतुसहकारितयाआवश्यकंसादृश्यविशिष्टपिंडदर्शनस्यैवका
रणत्वंयुक्तमित्यलंपल्लवितेन।स्मरणंजायतइति।सादृश्यविशिष्टपिंडदर्शनस्योद्बोधकतयातादृशवाक्यार्थस्मा
रकत्वादितिभावः।तदेवव्यापारइति।एतेनसादृश्यविशिष्टपिंडदर्शनोत्तरंयत्रातिदेशवाक्यार्थज्ञानंशब्दोधस्तत्रा
तिदेशवाक्यार्थस्मरणापेक्षाभावान्नातिदेशवाक्यार्थस्मृतिर्व्यापारंसादृश्यविशिष्टपिंडदर्शनंकरणंकिंतु
सादृश्यज्ञानमात्रंकरणंविशेषणज्ञानविधयातज्जन्यमतिदेशवाक्यार्थज्ञानंसादृश्यविशिष्टपिंडदर्शनं
बोधयंव्यापारइतिकस्यचिन्मतंप्रत्युक्तं।यत्रसादृश्यविशिष्टपिंडदर्शनोत्तरमतिदेशवाक्यार्थज्ञानंशब्दोधस्तत्रोप
मित्यनभ्युपगमात्किंतुतदुत्तरंपुनःसादृश्यविशिष्टपिंडदर्शनंततोतिदेशवाक्यार्थस्मरणंतदुत्तमेवोपमिति
रितिभावः।गवयोगवयपदवाच्यइतिज्ञानंजायतइति।एतेनोपमितिर्नप्रमित्यन्तरंकिंतुशब्दबोधात्मकैवगो
सदृशोगवयपदवाच्यइत्यत्रसदृशपदेनोपस्थितसादृश्यावच्छेदेनगवयपदवाच्यत्वग्रहस्यगोसदृशेगवयपद
वाच्यइत्याकारकस्मृतेश्चोपमितिस्वरूपत्वादित्यपास्तं।गवयत्वावच्छेदेनगवयपदवाच्यत्वविषयिण्याउपमिते
र्गवयपदजन्यत्वविशिष्टोपस्थितिंविनाशाब्दबोधरूपत्वासंभवादिति।नचगोसादृश्यस्यगवयत्वस्यचप्रत्य
क्षेणोपस्थितौकथंगवयत्वावच्छेदेनैवगवयपदवाच्यत्वोपमितिर्नतुसादृश्यावच्छेदेनेतिवाच्यं।उपस्थितेः

गवय२

स्तीत्येवमर्थयत्यजात्यपेक्षयागोसादृश्यस्यगौरयमित्येनतदर्थछेदेनगवयपदार्थायत्तोपमितिस्यात्तेरनुदयात्।
गवयपदाद्गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्चतत्प्रकारकशाब्दबोधेतदर्थछेदेनशक्तिग्रहस्यहेतुत्वात्।न
